न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।

माणिकचन्द्-दिगम्बर-जैन-ग्रन्थमाला।

१

चारित्रसारः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माणिकचन्द-दिगम्बरजैनग्रन्थमाला, नौवाँ पुष्प।

श्रीमच्चामुण्डरायविरचितः

चारित्रसारः।

जयपुरनगरनिवासिपण्डितइन्द्रलालसाहित्यशास्त्रिणा
पण्डितउदयलालकाशलीवालेन च
संशोधितः।

प्रकाशिका—

माणिकचन्द-दि० जैनग्रन्थमाला-समितिः।

भाद्र वीर नि० २४४३।

विक्रमाब्द १९७४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकाशक—
नाथूराम प्रेमी,
मंत्री, माणिकचन्द्र ग्रन्थमाला,
हीराबाग, पो० गिरगांव–बम्बई ।

मुद्रक—
चिंतामण सखाराम देवळे,
मुंबईवैभव प्रेस, सर्व्हंट्स् ऑफ इंडिया
सोसायटीज् होम, सँढर्स्ट रोड, गिरगांव,
बंबई ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माणिकचन्द्-ग्रन्थमाला ।

पूर्वप्रकाशित ग्रन्थ ।

१ **लघीयस्त्रयादिसंग्रह** । इसमें भट्टाकलंकदेवकृत लघीयस्त्रय सटीक, आचार्य अनन्तकीर्तिकृत लघु सर्वज्ञसिद्धि और बृहत्सर्वज्ञ-सिद्धि तथा अकलंकदेवकृत स्वरूपसम्बोधन, इन चार ग्रन्थोंका संग्रह छपा है । मूल्य ।=)

२ **सागारधर्मामृत सटीक** । पं० आशाधरकृत मूल और स्वोपज्ञ टीका सहित । मूल्य ।≡)

३ **विक्रान्तकौरवीय नाटक** । कवि श्रीहस्तिमल्लकृत । मू० ।=)

४ **पार्श्वनाथचरित** । महाकवि वादिराजसूरिकृत सुन्दर काव्य । मूल्य ॥)

५ **मैथिलीकल्याण नाटक** । कवि श्री हस्तिमल्लकृत । मू० ।)

६ **आराधनासार सटीक** । मूल गाथा श्रीदेवसेनाचार्यकृत और संस्कृत टीका श्रीरत्नकीर्तिदेवकृत । मूल्य ।)॥

७ **जिनदत्तचरित्र** । आचार्य गुणभद्रकृत । मूल्य ।)॥

८ **प्रद्युम्नचरित्र** । आचार्य महासेनकृत काव्य । मू० ॥)

मिलनेका पता—

श्रीजैनग्रन्थरत्नाकर कार्यालय,

हीराबाग, पो० गिरगांव—बंबई ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो निर्ग्रंथगुरुभ्यः ।

श्रीमच्चामुंडरायप्रणीतः ।

चारित्रसारः ।

मंगलाचरणम् ।

अरिहनन[1]रजोहननरहस्यहरं पूजनार्हमर्हन्तम् ।
सिद्धान्सिद्धाष्टगुणान् रत्नत्रयसाधकान् स्तुवे साधून् ॥

श्रीमज्जिनेन्द्रकथिताय सुमंगलाय लोकोत्तमाय शरणाय[2] विनयजंतोः ।
धर्माय कायवचनाशयशुद्धितोऽहं स्वर्गापवर्गफलदाय नमस्करोमि ॥

धर्मः सर्वसुखाकरो हितकरो धर्मं बुधाश्चिन्वते ।
धर्मेणैव समाप्यते शिवसुखं धर्माय तस्मै नमः ॥
धर्मान्नास्त्यपरः सुहृद्भवभृतां धर्मस्य मूलं दया ।
धर्मे चित्तमहं दधे प्रतिदिनं हे धर्म ! मां पालय[3] ॥

---

१ मोहनीयज्ञानदर्शनावरणान्तरायनष्टारम् । २ ' शरणं गृहरक्षित्रो ' इत्यमरः ।
३ अत्राखिलकारकसमावेशः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यक्त्व-पञ्चाणुव्रतवर्णनम् ।

सम्यग्दृष्टीनां चत्वारो वंदना प्रधानभूताः, अर्हन्तः सिद्धाः साधवो धर्मश्चेति । तत्रार्हत्सिद्धसाधवो नमस्कारेणोक्ताः । धर्म उच्यते । आत्मानमिष्टनरेंद्रसुरेंद्रमुनींद्रमुक्तिस्थाने धत्त इति धर्मः । अथवा संसारस्थान्प्राणिनो धरते धारयतीति वा धर्मः । स च सागाराऽनगारविषयभेदाद्द्विविधः । तत्र सागारधर्म उच्यते ।

दार्शनिकव्रतिकावपि सामायिकप्रोषधोपवासश्च ।
सचित्तरात्रिभुक्तिव्रतनिरतौ ब्रह्मचारी च ॥
आरंभाद्विनिवृत्तः परिग्रहादनुमतस्तथोद्दिष्टः ।
इत्येकादशनिलया जिनोदिताः श्रावकाः क्रमशः ॥

व्रतादयो गुणा दर्शनादिभिः पूर्वगुणैः सह क्रमप्रवृद्धा भवंति । तत्र दार्शनिकः संसारशरीरभोगनिर्विण्णः पंचगुरुचरणभक्तः सम्यग्दर्शनविशुद्धश्च भवति । जिनेन भगवताऽर्हता परमेष्ठिनोपदिष्टे निर्ग्रंथलक्षणे मोक्षमार्गे श्रद्धानं सम्यग्दर्शनम् । तस्य सम्यग्दर्शनस्य मोक्षपुरपथिकपाथेयस्य मुक्तिसुंदरीविलासमणिदर्पणस्य संसारसमुद्रगर्तावर्त्तमग्नजनदत्तहस्तावलंबनस्यैकादशोपासकस्थानप्रासादाधिष्ठानस्योत्तमक्षमादिदशकुलधर्मकल्पपादपमूलस्य परमपावनस्य सकलमंगलनिलयस्य मोक्षमुख्यकारणस्याष्टांगानि भवंति । निःशंकितत्त्वं निःकांक्षता निर्विचिकित्सता अमूढदृष्टित्वं उपबृंहणं स्थितिकरणं वात्सल्यं प्रभावना चेति । तत्रेहलोकः परलोकः व्याधिर्मरणं अगुप्तिः अत्राणं आकस्मिक इति सप्तविधाद्भयाद्विनिर्मुक्तता, अथवाऽर्हदुपदिष्टद्वादशांगप्रवचनगहने एकमक्षरं पदं वा किमिदं स्याद्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न वेति शंकानिरासो निःशंकितत्त्वम् । ऐहलौकिकपारलौकिकेंद्रियविषय उपभोगाकांक्षानिवृत्तिः, कुदृष्टयंतराकांक्षानिरासो वा निःकांक्षता । शरीराद्यशुचित्वभावमवगम्य शुचीति मिथ्यासंकल्पापनयोऽथवाऽर्हत्प्रवचने इदमयुक्तं घोरं कष्टं न चेदिदं सर्वमुपपन्नमित्यशुभभावनानिरासो विचिकित्साविरहः । बहुविधेषु दुर्नयवर्त्मसु तत्त्ववदाभासमानेषु युक्त्यभावमध्यवस्य परीक्षाचक्षुषा विरहितमोहममूढदृष्टित्त्वम् । उत्तमक्षमादिभावनयाऽऽत्मन आत्मीयस्य च धर्मपरिवृद्धिकरणमुपबृंहणम् । कषायोदयादिषु धर्मपरिभ्रंशकारणेषूपस्थितेषु स्वपरयोर्धर्मप्रच्यवनपरिपालनं स्थितिकरणम् । जिनप्रणीते धर्मामृते नित्यानुरागताऽथवा सद्यःप्रसूता यथा गौर्वत्से स्निह्यति तथा चातुर्वर्ण्ये संघेऽकृत्रिमस्नेहकरणं वात्सल्यम् । सम्यग्दर्शनज्ञानचारित्रत्रयप्रभावादात्मनः प्रकाशनमथवा ज्ञानतपःपूजासु ज्ञानदिनकरकिरणैः परसमयखद्योताद्योतावरणकरणं च, महोपवासादिलक्षणेन देवेंद्रविष्टरप्रकंपनसमर्थेन सत्तपसा स्वसमयप्रकटनं च महापूजामहादानादिभिर्धर्मप्रकाशनं च प्रभावना । एवंविधाष्टांगविशिष्टं सम्यक्त्वं तद्विकलयोरणुव्रतयोर्नामापि न स्यात् । सम्यग्दर्शनमणुव्रतयुक्तं स्वर्गाय, महाव्रतयुक्तं मोक्षाय च ।

सम्यक्त्वमंगहीनं राज्यमिव श्रेयसे भवेन्नैव ।
न्यूनाक्षरो हि मंत्रो नालं विषवेदनाच्छित्त्यै ॥

सम्यक्त्वस्य गुणाः ।

संवेगो निर्वेदो निंदा गर्हा तथोपशमभक्ती ।
अनुकंपा वात्सल्यं गुणास्तु सम्यक्त्वयुक्तस्य ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तं चाबद्धायुष्कविषये—

सम्यग्दर्शनशुद्धा नारकतिर्यङ्नपुंसकस्त्रीत्वानि ।
दुःकुलविकृताल्पायुर्दरिद्रतां च व्रजंति नाप्यव्रतिकाः ॥

भवाब्धौ भव्यसार्थस्य निर्वाणद्वीपयायिनः ।
चारित्रयानपात्रस्य कर्णधारो हि दर्शनम् ॥

दार्शनिकस्य कस्यचित्कदाचिद्दर्शनमोहोदयादतीचाराः पंच भवंति । शंकाकांक्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवा इति ।

तत्र मनसा मिथ्यादृष्टेर्ज्ञानचरित्रगुणोद्भावनं प्रशंसा, वचसा भूताभूतगुणोद्भावनं संस्तवः, एवं प्रशंसासंस्तवयोर्मानसकृतो वाक्कृतश्च भेदः, शेषाः सुगमाः । सम्यग्दर्शनसामान्यादणुव्रतिकमहाव्रतिनोरिमेऽतीचाराः ।

व्रतिको निःशल्यः पंचाणुव्रतरात्रिभोजनविरमणशीलसप्तकं निरतिचारेण यः पालयति स भवति । तत्र यथा शरीरानुप्रवेशिकांडकुंतादिप्रहरणं शरीरिणां बाधाकरं तथा कर्मोदयविकारे शरीरमानसबाधाहेतुत्वाच्छल्यमिव शल्यम् । तत्त्रिविधं, मायानिदानमिथ्यादर्शनभेदात् । माया वंचनं, निदानं विषयभोगाकांक्षा, मिथ्यादर्शनमतत्त्वश्रद्धानम् । उत्तरत्र वक्ष्यमाणेन महाव्रतिनाऽपि शल्यत्रयं परिहर्त्तव्यम् ।

अभिसंधिकृतो नियमो व्रतमित्युच्यते, सर्वसावद्यानिवृत्त्यसंभवादणुव्रतं द्वींद्रियादीनां जंगमप्राणिनां प्रमत्तयोगेन प्राणव्यपरोपणान्मनोवाक्कायैश्च निवृत्तः । अगारीत्याद्यणुव्रतम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य प्रमत्तयोगात्प्राणव्यपरोपणलक्षणस्य पंचातीचारा भवंति । बंधो, वधः, छेदः, अतिभारारोपणं, अन्नपाननिरोधश्चेति । तत्राभिमतदेशगमनं प्रत्युत्सुकस्य तत्प्रतिबंधहेतोः कीलादिषु रज्ज्वादिभिर्व्यतिषंगो बंधः । दंडकशावेत्रादिभिः प्राणिनामभिघातो वधः । कर्णनासिकादीनामवयवानामपनयनं छेदः । न्यायादनपेताद्भारादतिरिक्तस्य भारस्य वाहनमतिलोभाद्गवादीनामतिभारारोपणम् । तेषां गवादीनां कुतश्चित्कारणात् क्षुत्पिपासाबाधोत्पादनमन्नपाननिरोध इति ।

स्नेहस्य मोहस्य द्वेषस्य वोद्रेकाद्यदसत्याभिधानं ततो निवृत्तादरो गृहीति द्वितीयमणुव्रतम् ।

तस्य व्रतस्य पंचातिक्रमा भवंति । मिथ्योपदेशः, रहोऽभ्याख्यानं, कूटलेखक्रिया, न्यासापहारः, साकारमंत्रभेदश्चेति ।

तत्राभ्युदयनिःश्रेयसार्थेषु क्रियाविशेषेषु अन्यस्यान्यथा प्रवर्त्तनमभिसंधानं वा मिथ्योपदेशः । स्त्रीपुरुषाभ्यामेकांतेऽनुष्ठितस्य क्रियाविशेषस्य प्रकाशनं रहोऽभ्याख्यानम् । अन्येनानुक्तं यत्किंचित्परप्रयोगवशादेवं तेनोक्तमनुष्ठितमिति वंचनानिमित्तं लेखनं कूटलेखक्रिया । हिरण्यादेर्द्रव्यस्य निक्षेप्तुर्विस्मृतसंख्यस्याल्पसंख्यानमाददानस्य 'एवमित्य-' नुज्ञावचनं न्यासापहारः । अर्थप्रकरणांगविकारभूक्षेपादिभिः पराकूतमुपलभ्य यदाविष्करणमसूयादिनिमित्तं तत्साकारमंत्रभेद इति ।

अन्यपीडाकरं पार्थिवादिभयवशादवशपरित्यक्तं वा निहितं पतितं विस्मृतं वा यददत्तं ततो निवृत्तादरः श्रावक इति तृतीयमणुव्रतम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अदत्तादानविरतेः पंचातीचारा भवंति। स्तेनप्रयोगः, तदाहृतादानं, विरुद्धराज्यातिक्रमः, हीनाधिकमानोन्मानं, प्रतिरूपकव्यवहारश्चेति। मोषकस्य त्रिधा प्रयोजनं; मुष्णन्तं स्वयमेव प्रयुंक्ते, अन्येन वा प्रयोजयति, प्रयुक्तमनुमन्यते वा यः सः स्तेनप्रयोगः। अप्रयुक्तेनाननुमतेन च चौरेणानीतस्य ग्रहणं तदाहृतादानम्। विरुद्धं राज्यं विरुद्धराज्यं, उचितन्यायादन्येन प्रकारेणादानं ग्रहणमतिक्रमः, तस्मिन्विरुद्धराज्ये योऽसावतिक्रमः स विरुद्धराज्यातिक्रमः। प्रास्थादिमानं तुलाद्युन्मानमेतेन न्यूनेनान्यस्मै देयमधिकेनात्मना ग्राह्यमित्येवमादि कूटप्रयोगो हीनाधिकमानोन्मानम्। कृत्रिमैर्हिरण्यादिभिर्वंचनापूर्वको व्यवहारः प्रतिरूपकव्यवहार इति।

उपात्ताया अनुपात्तायाश्च परांगनायाः संगाद्विरतरतिर्विरताविरत इति चतुर्थमणुव्रतम्।

स्वदारसंतोषव्रतस्यातीचाराः पंच भवंति। परविवाहकरणं, इत्वरिका-अपरिगृहीतागमनं, इत्वरिकापरिगृहीतागमनं, अनंगक्रीडा, कामतीव्राभिनिवेशश्चेति। तत्र सद्वेद्यस्य चारित्रमोहस्य चोदयाद्विवहनं विवाहः परस्य विवाहकरणं परविवाहकरणं। ज्ञानावरणक्षयोपशमादापादितकलागुणज्ञतया चारित्रमोहस्त्रीवेदोदयप्रकर्षादंगोपांगनामोदयावष्टंभाच्च परपुरुषानेतीति इत्वरिका या गणिकात्वेन वा पुंश्चलित्वेन परपुरुषगमनशीला अस्वामिका सा अपरिगृहीता, तस्यां गमनमित्वरिका-अपरिगृहीतागमनम्। या पुनरेकपुरुषभर्तृका सा परिगृहीता, तस्यां गमनमित्वरिकापरिगृहीतागमनम्। अंगं प्रजननं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योनिश्च, ततो जघनादन्यत्रानेकविधप्रजननविकारेण रतिरनंगक्रीडा। कामस्य प्रवृद्धः परिणामोऽनुपरतवृत्त्यादिः कामतीव्राभिनिवेश इति।

धन्यधान्यक्षेत्रादीनामिच्छावशात् कृतपरिच्छेदो गृहीति पंचममणुव्रतम्।

परिग्रहविरमणव्रतस्य पंचातिक्रमा भवंति। क्षेत्र-वास्तु-हिरण्य-सुवर्ण-धन-धान्य-दासी-दास-कुप्यमिति। तत्र क्षेत्रं सस्याधिकरणं, वास्तु अगारं, हिरण्यं रूप्यादिव्यवहारप्रयोजनं, सुवर्णं विख्यातं, धनं गवादि, धान्यं व्रीह्यादि, दासीदासं भृत्यस्त्रीपुरुषवर्गः, कुप्यं क्षौमकार्पासकौशेयचंदनादि, एतेषु एतावानेव परिग्रहो मम नाऽस्तोऽन्य इति परिच्छिन्नात्प्रमाणात् क्षेत्रवास्त्वादिविषयादतिरेक अतिलोभवशात्प्रमाणतिरेक इति।

रात्रावन्नपानखाद्यलेह्येभ्यश्चतुर्भ्यः सत्त्वानुकंपया विरमणं रात्रिभोजनविरमणं षष्ठमणुव्रतम्।

वधादसत्याच्चौर्याच्च कामाद्ग्रंथान्निवर्त्तनम्।
पंचधाऽणुव्रतं रात्र्यभुक्तिः षष्ठमणुव्रतम्॥

इत्यणुव्रतवर्णनम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शीलसप्तकवर्णनम् ।

स्थवीयसीं विरतिमभ्युपगतस्य श्रावकस्य व्रतविशेषो गुणव्रतत्रयं शिक्षाव्रतचतुष्टयं शीलसप्तकमित्युच्यते । दिग्विरतिः, देशविरतिः, अनर्थदंडविरतिः, सामायिकं, प्रोषधोपवासः, उपभोगपरिभोगपरिमाणं, अतिथिसंविभागश्चेति ।

तत्र प्राची, अपाची, उदीची, प्रतीची, ऊर्द्ध्वं, अधो, विदिशश्चेति । तासां परिमाणं योजनादिभिः पर्वतादिप्रसिद्धाभिज्ञानैश्च ताश्च दिशो दुष्परिहारैः क्षुद्रजंतुभिराकुला अतस्ततो बहिर्न यास्यामीति निवृत्तिर्दिग्विरतिः । निरवशेषतो निवृत्तिं कर्त्तुमशक्नुवतः शक्त्या प्राणिवधविरतिं प्रत्यागूर्णस्यात्र प्राणनिमित्तं यात्रा भवतु मा वा सत्यपि प्रयोजनभूयस्त्वे परिमिताद्दिगवधेर्बहिर्न यास्यामीति प्रणिधानादहिंसाद्यणुव्रतधारिणोऽप्यस्य परिगणिताद्दिगवधेर्बहिर्मनोवाक्काययोगैः कृतकारितानुमतविकल्पैर्हिंसादिसर्वनिवृत्तिरिति महाव्रतं भवति ।

दिग्विरमणव्रतस्य पंचातीचारा भवंति । उर्द्ध्वातिक्रमः, अधोऽतिक्रमः, तिर्यगतिक्रमः, क्षेत्रवृद्धिः, स्मृत्यंतराधानं चेति । तत्र पर्वतमरुद्भूम्यादीनामारोहणादूर्द्ध्वातिक्रमः । कूपावतरणादिरधोतिक्रमः । भूमिबिलगिरिदरीप्रवेशादिस्तिर्यगतिक्रमः । प्राग्दिशो योजनादिभिः परिच्छिद्य पुनर्लोभवशात्ततोऽधिकाकांक्षणं क्षेत्रवृद्धिः । इदमिदं मया योजनादिभिरभिज्ञानं कृतमिति तदभावः स्मृत्यंतराधानम् । दिग्विरमणव्रतस्य प्रमादान्मोहाद् व्यासंगादतीचारा भवंति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मदीयस्य गृहांतरस्य तडागस्य वा मध्यं मुक्त्वा देशांतरं न गमिष्यामीति तन्निवृत्तिर्देशविरतिः । प्रयोजनमपि दिग्विरतिवद्देश-विरतिव्रतस्य ।

तस्य पंचातीचारा भवंति । आनयनं, प्रेष्यप्रयोगः, शब्दानु-पातः, रूपानुपातः, पुद्गलक्षेप इति । तत्रात्मना संकल्पितदेशे स्थि-तस्य प्रयोजनवशाद्यत्किंचिदानयेत्याज्ञापनमानयनम् । परिच्छिन्नदे-शाद्बहिः स्वयमगत्वाऽन्यप्रेष्यप्रयोगेनैवाभिप्रेतव्यापारसाधनं प्रेष्य-प्रयोगः। व्यापारकरान्पुरुषानुद्दिश्याभ्युत्कासिकादिकरणं शब्दानुपातः। । रूपं निरीक्ष्य व्यापारमचिरान्निष्पादयंतीति स्वांगदर्शनं रूपा-नुपातः । कर्मकरानुद्दिश्य लोष्टपाषाणादिनिपातः पुद्गलक्षेप इति । दिग्विरतिः सार्वकालिकी । देशविरतिर्यथाशक्तिकालनियमेनेति ।

प्रयोजनं विना पापादानहेतुरनर्थदंडः । स च पंचविधः । अप-ध्यानं, पापोपदेशः, प्रमादाचरितं, हिंसाप्रदानं, अशुभश्रुतिरिति । तत्र जयपराजयवधबंधांगछेदसर्वस्वहरणादिकं कथं स्यादिति मनसा चिंतनमपध्यानम् । पापोपदेशश्चतुर्विधः । क्लेशवणिज्या, तिर्यग्वणिज्या, वधकोपदेशः, आरंभकोपदेशश्चेति । तत्रास्मिन्प्रदेशे दासीदासाश्च सुलभास्तानमून्देशान्नीत्वा विक्रये कृते महानर्थलाभो भविष्यतीति क्लेशवणिज्या । गोमहिष्यादीन्पशूनत्र गृहीत्वाऽन्यत्र देशे व्यवहारे कृते सति भूरि वित्तलाभ इति तिर्यग्वणिज्या । वागुरिकशौकरिक-शाकुनिकादिभ्यो मृगवराहशकुंतप्रभृतयोऽमुष्मिन्देशे संतीति वचनं वधकोपदेशः । आरंभकेभ्यः कृषिबलादिभ्यः क्षित्युदकज्वलनपवन-वनस्पात्यारंभोऽनेनोपायेन कर्त्तव्य इत्याख्यानमारंभकोपदेशः । इत्येवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकारं पापसंयुक्तं वचनं पापोपदेशः। प्रयोजनमंतरेण भूमिकुट्टनसलिलसेचनाग्निविध्यापनवातप्रतिघातवनस्यातिच्छेदनाद्यवद्यकर्म प्रमादाचरितं विषशस्त्राग्निरज्जुकशादंडादिहिंसोपकरणप्रदानं हिंसाप्रदानम्। रागादिप्रवृद्धितो दुष्टकथाश्रवणश्रावणशिक्षणव्यापृतिरशुभश्रुतिरिति। एतस्मादनर्थदंडाद्विरतिः कार्या।

अनर्थदंडविरमणव्रतस्य पंचातीचारा भवंति। कंदर्पः, कौत्कुच्यं, मौखर्यं, असमीक्ष्याधिकरणं, उपभोगपरिभोगानर्थक्यमिति। चारित्रमोहोदयापादितादागोद्रेकाद्यो हास्यसंयुक्तोऽशिष्टवाक्प्रयोगः सः कंदर्पः। रागस्य समावेशाद्धास्यवचनमविशिष्टवचनमित्येतदुभयं परस्मिन् दुष्टेन कायकर्मणा युक्तं कौत्कुच्यम्। अशालीनतया यत्किंचनानर्थकं बहु प्रलपनं तन्मौखर्यम्। असमीक्ष्याधिकरणं त्रिविधम्। मनोवाक्कायविषयभेदात्। तत्र मानसं परानर्थककाव्यादिचिंतनम्। वाग्भवं निष्प्रयोजनकथाव्याख्यानं परपीडाप्रधानं यत्किंचन वक्तृत्वं च। कायिकं प्रयोजनमंतरेण गच्छंस्तिष्ठन्नासीनो वा सचित्ताचित्तपत्रपुष्पफलच्छेदनभेदनकुट्टनक्षेपणादीनि कुर्यात्, अग्निविषक्षारादिप्रदानं चारभेत। इत्येवमादि तदेतत्सर्वमसमीक्ष्याधिकरणम्। यस्य यावतार्थेनोपभोगोपरिभोगौ परिकल्पितौ तस्य तावानेवार्थ इत्युच्यते, ततोऽन्यस्याधिक्यमानर्थक्यं तदुपभोगपरिभोगानर्थक्यम्।

सम्यगेकत्वेनायनं गमनं समयः, स्वविषयेभ्यो विनिवृत्त्य कायवाङ्मनःकर्मणामात्मना सह वर्त्तनाद्द्रव्यार्थेनात्मन एकत्वगमनमित्यर्थः। समय एव सामायिकं, समयः प्रयोजनमस्येति वा सामायिकम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्च नियतकाले नियतदेशे च भवति । निर्व्याक्षेपमेकांतं भवनं वनं चैत्यालयादिकं च देशं मर्यादीकृत्य केशबंधं मुष्टिबंधं वस्त्रबंधं पर्यंकमकरमुखाद्यासनं स्थानं च । कालमवधिं कृत्वा शीतोष्णादि परीषहविजयी, उपसर्ग सहिष्णुर्मौनी हिंसादिभ्यो विषयकषायेभ्यश्च विनिवृत्य सामायिके वर्त्तमानो महाव्रती भवति । हिंसादिषु सर्वेष्वनासक्तचित्तोऽभ्यंतरप्रत्याख्यानसंयमघातिकर्मोदयजनितमंदाविरतिपरिणामे सत्यपि महाव्रतमित्युपचर्यते । एवं च कृत्वाऽभव्यस्यापि निर्ग्रंथलिंगधारिण एकादशांगाध्यायिनो महाव्रतपरिपालनादसंयमभावस्याप्युपरिमग्रैवेयकविमानवासितोपन्ना भवंति । एव भव्योऽपि निर्ग्रंथरूपधारी सामायिकवशादहमिंद्रस्थानवासी भवति चेत्किं पुनः सम्यग्दर्शनपूतात्मा सामायिकमापन्न इति ।

समायिकव्रतस्य सर्वसावद्ययोगप्रत्याख्यानस्य पंचातीचारा भवंति । कायदुःप्रणिधानं, वाग्दुःप्रणिधानं, मनोदुःप्रणिधानं, अनादरः, स्मृत्यनुपस्थापनं चेति । तत्र दुष्टं प्रणिधानं, दुःप्रणिधानं, अन्यथा वा प्रणिधानं दुःप्रणिधानम्, क्रोधादिपरिणामवशाद्दुष्टं प्रणिधानम् भवति, शरीरावयवानामनिभृतावस्थानं कायदुःप्रणिधानम् । वर्णसंस्कारे भावार्थे चागमकत्वं चापलादि वाग्दुःप्रणिधानम् । मनसोऽनर्पितत्वं मनोदुःप्रणिधानम् । इति कर्त्तव्यतां प्रत्यसाकल्याद्यथा कथंचित्प्रवृत्तिरनुत्साहोऽनादरः । अनैकाग्र्यमसमाहितमनस्कता स्मृत्यनुपस्थानं, अथवा रात्रिंदिवं प्रमादिकस्य संचिंत्यानुपस्थानं स्मृत्यनुपस्थानम् । मनोदुःप्रणिधानस्मृत्यनुपस्थानयोरयं भेदः, क्रोधाद्यावेशात्सामायिकौदासीन्येन वा चिरकालमव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थापनं मनसो मनोदुःप्रणिधानं, चिंतायाः परिस्पंदनादैकाग्र्येणानवस्थापनं स्मृत्यनुपस्थापनमिति विस्पष्टमन्यत्वम् ।

प्रोषधः पर्वपर्यायवाची, शब्दादिग्रहणं प्रति निवृत्तौत्सुक्यानि पंचापीन्द्रियाणि उपेत्य तस्मिन्वसंतीत्युपवासः । उक्तं च—

उपेत्याक्षाणि सर्वाणि निवृत्तानि स्वकार्यतः ।
वसंति यत्र सः प्राज्ञैरुपवासोऽभिधीयते ॥

पर्वणि चतुर्विधाऽऽहारनिवृत्तिः प्रोषधोपवासः, निरारंभः श्रावकः स्वशरीरसंस्कारकारणस्नानगंधमाल्याभरणादिभिर्विरहितः शुचावकाशे साधुनिवासे चैत्यालये स्वप्रोषधोपवासगृहे वा धर्मकथाश्रवणश्रावणचिन्तनावहितांतःकरणः सन्नुपवसेत् ।

प्रोषधोपवासस्य पंचातीचारा भवंति । अप्रत्यवेक्षिताप्रमार्जितोत्सर्गः, अप्रत्यवेक्षिताप्रमार्जितादानं, अप्रत्यवेक्षिताप्रमार्जितसंस्तरोपक्रमणं, अनादरः, स्मृत्यनुपस्थानं चेति । तत्र जंतवः संति न संति वेति प्रत्यवेक्षणं चक्षुषोर्व्यापारो मृदुनोपकरणेन यत्क्रियते प्रयोजनं तत्प्रमार्जनं अप्रत्यवेक्षितायां भुवि मूत्रपूरीषोत्सर्गोऽप्रत्यवेक्षिताप्रमार्जितोत्सर्गः । अप्रत्यवेक्षिताप्रमार्जितस्यार्हदाचार्यादिपूजोपकरणस्य गंधमाल्यधूपादेरात्मपरिधानाद्यर्थस्य वस्त्रपात्रादेश्चादानमप्रत्यवेक्षिताप्रमार्जितादानम् । अप्रत्यवेक्षिताप्रमार्जितस्य प्रावरणादेः संतस्तरणस्योपक्रमणप्रत्यवेक्षिताप्रमार्जितसंस्तरोपक्रमणम् । क्षुत्पीडितत्त्वादावश्यकेष्वनुत्साहोऽनादरः । स्मृत्यनुपस्थानं व्याख्यातमेव ।

उपेत्यात्मसात्कृत्य भुज्यत इत्युपभोगः, अशनपानगंधमाल्यादि सकृद् भुक्त्वा पुनरपि भुज्यत इति परिभोगः, आच्छादनप्रावरणाल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारशयनाशनगृहयानवाहनादिः तयोः परिमाणमुपभोगपरिभोगपरिमाणम् । भोगपरिसंख्यानं पंचविधं,त्रसघातप्रमादबहुवधानिष्टानुपसेव्यविषयभेदात् । तत्र मधुमांसं सदा परिहर्त्तव्यं त्रसघातं प्रति निवृत्तचेतसा मद्यमुपसेव्यमानं कार्याकार्यविवेकसंमोहकरमिति तद्वर्जनं । प्रमादविरहाय केतक्यर्जुनपुष्पादीनि बहुजंतुयोनिस्थानानि, आर्द्रशृंगवेरमूलकहरिद्रानिंबकुसुमादीन्यनंतकायव्यपदेशार्हाणि; एतेषामुपसेवनेन बहुघातोऽल्पफलमिति तत्परिहारः श्रेयान् । यानवाहनाभरणादिष्वेतावदेवेष्टमतोऽन्यदनिष्टमित्यनिष्टान्निवर्त्तनं कर्त्तव्यम् । न हि व्रतमभिसंधिनियमाभावे सतीष्टानामपि चित्रवस्त्रवेषाभरणादीनामनुपसेव्यानां परित्यागः कार्यो यावज्जीवं । अथ न शक्तिः कालपरिच्छेदेन वस्तुपरिमाणेन च शक्त्यनुरूपं निवर्त्तनं कार्यम् ।

उपभोगपरिभोगपरिमाणव्रतस्यातीचाराः पंच भवंति। सचित्ताहारः सचित्तसंबंधाहारः, सचित्तसन्मिश्राहारः, अभिषवाहारः, दुःपक्काहार श्चेति । तत्र चेतनावद्द्रव्यं सचित्तं हरितकायः तदभ्यवहरणं सचित्ताहारः। सचित्तवतोपश्लिष्टः सचित्तसंबद्धाहारः । सचित्तेन व्यतिकीर्णः सचित्तसन्मिश्राहारः । सौवीरादिद्रवो वा वृष्यं वाऽभिषवाहारः । सांतस्तंदुलभावेनातिक्लेदनेन वा दुष्टः पक्को दुःपक्काहारः । संबंधमिश्रयोरयं भेद, संसर्गमात्रं संबंधः, सूक्ष्मजंतुव्याकीर्णत्वाद्विभागीकर्त्तुमशक्यः सन्मिश्रः । एतेषामभ्यवहरणे सचित्तोपयोग इंद्रियमदवृद्धिर्वातादिप्रकोपो वा स्यात् । तत्प्रतीकारविषये पापलेपो भवति । अतिथयश्चैनं परिहरेयुरिति ।

संयममविनाशयन्नततीत्यतिथिरथवा नास्य तिथिरस्तीत्यतिथि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रानियतकालगमनमित्यर्थः । अतिथये संविभागोऽतिथिसंविभागः, स चतुर्विधः, भिक्षोपकरणौषधप्रातिश्रयभेदात् ।

उक्तं हि—

प्रतिग्रहोच्चस्थाने च पादक्षालनमर्चनम् ।
प्रणामो योगशुद्धिश्च भिक्षाशुद्धिश्च ते नव ॥

उक्तं हि—

श्रद्धा शक्तिरलुब्धत्वं भक्तिर्ज्ञानं दया क्षमा ।
इति श्रद्धादयः सप्त गुणाः स्युर्गृहमेधिनाम् ॥

एवंविधनवविधपुण्यैः प्रतिपत्तिकुशलेन सप्तगुणैः समन्वितेन मोक्षमार्गमभ्युद्युतायातिथये संयमपरायणाय शुद्धचेतसाऽऽश्चर्यपंचकादिकमनिच्छता निरवद्या भिक्षा देया । धर्मोपकरणानि च सम्यग्दर्शनज्ञानचारित्रोपबृंहणानि दातव्यानि । औषधं ग्लानाय वातपित्तश्लेष्मप्रकोपहताय योग्यमुपयोजनीयम् । प्रतिश्रयश्च परमधर्मश्रद्धया प्रतिपादयितव्य इति ।

अतिथिसंविभागव्रतस्य पंचातीचारा भवंति । सचित्तनिक्षेपः, सचित्तपिधानं, परव्यपदेशः, मात्सर्यं, कालातिक्रमश्चेति । तत्र सचित्ते पद्मपत्रादौ निधानं सचित्तनिक्षेपः । सचित्तेनावरणं सचित्तपिधानं । अयमत्र दाता दीयमानोऽप्ययमस्येति समर्पणं परव्यपदेशः । प्रयच्छतोऽपि सत आदरमंतरेण दानं मात्सर्यम् । अनगाराणामयोग्ये काले भोजनं कालातिक्रम इति । पात्रदानं स्वस्य परस्य चोपकारः, स्वोपकारः पुण्यसंचयः परोपकारः सम्यग्ज्ञानादिवृद्धिः । तच्च दानं पारंपर्येण मोक्षकारणं साक्षात्पुण्यहेतुः । विधिविशेषाद्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यविशेषाद्दातृविशेषात्पात्रविशेषाद्दानविशेषः । तत्र प्रतिग्रहोच्चदेश स्थापनमित्येवमादीनां क्रियाणामादरेण करणं विधिविशेषः । दीयमानेऽन्नादौ प्रतिग्रहीतुस्तपःस्वाध्यायपरिवृद्धिकरणत्वाद्द्रव्यविशेषः । प्रतिग्रहीतृजनेऽभ्यस्ततया त्यागोऽविषादो दित्सतो ददतो दत्तवतश्च प्रीतियोगः, कुशलाभिसंधितावसुधारासुरप्रशंसादिदृष्टफलानपेक्षिता, निरुपरोधत्वमनिदानत्वे श्रद्धादिगुणसमन्वितत्वमित्येवमादि दातृविशेषः । मोक्षकारणगुणसंयोगः पात्रविशेषः । ततश्च फलविशेषः ।

सत्पात्रोपगतं दानं सुक्षेत्रगतबीजवत् ।
फलाय यदपि स्वल्पं तदनल्पाय कल्प्यते ॥

तथा च—दानफलविशेषेणोत्तमभोगभूमौदशविधकल्पवृक्षजनितसुखफलं श्रीषेणोऽन्वभूत् ।

तथा च—दानानुमोदेन रतिवररतिवेगाख्यं कपोतमिथुनं विजयार्द्धप्रतिबद्धगांधारविषयसुसीमानगराधिपतेरादित्यगते रतिवरवरो हिरण्यवर्मनामा नंदनोऽभूत् । तस्मिन्नेव गिरौ गिरिविषये भोगपुरपतेर्वायुरथस्य रतिवेगवरी प्रभावत्याख्या तनयाऽभूत् । एवं हिरण्यवर्मा प्रभावती च जातिकुलसाधितविद्याप्रभावेन सुखमन्वभूताम् । उक्तहिंसादिपंचदोषविरहितेन द्यूतमद्यमांसानि परिहर्त्तव्यानि । तथा चोक्तं महापुराणे—

हिंसासत्यस्तेयादब्रह्मपरिग्रहाच्च बादरभेदात् ।
द्यूतान्मांसान्मद्याद्विरतिर्गृहिणोऽष्ट संत्यमी मूलगुणाः ॥

कितवस्य सदा रागद्वेषमोहवंचनानृतानि प्रजायंतेऽर्थक्षयोऽपि भवति जनेष्वविश्वसनीयश्च, सप्तव्यसनेषु प्रधानं द्यूतं तस्मात्तत्परिहर्त्तव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा च—भरतेऽस्मिन्कुलालविषये श्रावस्तिपुराधिपतिः सुकेतुमहाराजो महाभोगी द्यूतव्यसनाभिहतः स्वकीयं कोशं राष्ट्रमंतःपुरं च द्यूते हारयित्वा महादुःखाभिभूतोऽभूत् । तथा च युधिष्ठिरोऽपि द्यूतेन राज्याद्भ्रष्टः कष्टां दशामवाप ।

मांसान्निवृत्तिरहिंसाव्रतपरिपालनार्थं, मांसाशिनं साधवो विनिंदंति प्रत्ये च दुःखभाग्भवति । तथा चान्यैरुक्तम्—

मां स भक्षयति प्रेत्य यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदंति मनीषिणः ॥
मांसं प्राणिशरीरं प्राण्यंगस्य च विदारणेन विना ।
तन्नाप्यते ततस्तत्त्यक्तं जैनैः सदा सर्वैः ॥

तथा हि—कुंभनाम्नो नरपतेर्भीमो नाम महानसिकस्तिर्यग्मांसमलभमानो मृतशिशुमांसं सर्वसंभारेण सन्मिश्रं कृत्वा कुंभस्य दत्तवान् । ततः प्रभृति सोऽपि नरमांसलोलुपः संजातः । तज्ज्ञात्वा प्रकृतयो राज्यस्यायमयोग्य इति तं परिहृतवत्यः । तथा च विंध्यमलयकुटजवने किरातमुख्यः खदिरसारः समाधिगुप्तमुनिं दृष्ट्वा प्रणतस्तस्मै धर्मलाभ इत्युक्ते कोऽसौ धर्मः, कोऽसौ लाभ इत्युक्तपरिप्रश्ने मांसादिनिवृत्तिर्धर्म्मस्तत्प्राप्तिर्लाभस्ततः स्वर्गादिसुखं जायत इत्युक्तवति मुनौ तत्सर्वं परिहर्त्तुमहमशक्त इति वचने तदाकूतमवधार्य त्वया काकमांसं पूर्वं किं भक्षितमुत न वेत्युक्तेऽकृतभक्षणोऽहमिति प्रतिवचने यद्येवं तद्भक्षणव्रतं त्वया गृह्यतामित्युपदेशेन तत्परिगृह्याभिवंद्य गतवतः कालांतरे तस्यामये समुत्पन्ने सति वैद्येन काकमांसभक्षणादस्य व्याधेरुपशमो भविष्यतीत्युक्ते कंठगतेष्वपि प्राणेषु मया न कर्तव्यं तत्काकमांसोपयोगविरमणव्रतं तपोधनसमीपे परि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृहीतं, संकल्पभंगे कुतः सत्पुरुषता ? ततः काकमांसाभ्यवहरणं न करिष्यामीति प्रतिज्ञाने समुपलक्षिततदीयाकूतस्तं मांसमुपयोजयितुं सौरपुराधिपतिः शूरवीरनामा तस्य मैथुनः समागच्छन् वनगहनगतवटतरोरधः कांचिदभिरुदतीं समीक्ष्य 'कथय केन हेतुना रोदिष्येका त्वम्' इत्यनुयुक्ता साऽवोचदहं यक्षी । तव श्यालकं बलवदामयपरिपीडितं मांसभक्षणविरमणव्रतफलेन मे भविष्यंतमधिपतिं भवानद्य मांसभोजनेन नरकगतिभागिनं कर्त्तुं प्रारभत इति रोदनमनुभवामीति तयोदितः 'श्रद्धेहि' तदहं न कारयिष्यामीति व्याहृत्य गत्वा तमवलोक्य शरीरामयनिराकरणहेतुस्त्वया मांसोपयोगः क्रियतामिति प्रियश्यालकवचनश्रवणेन 'त्वं प्राणसमो बंधुः श्रेय एव मे कथयितुमर्हसि, न हितार्थवचनमेतन्नरकगतिप्रापणहेतुत्वादेवं म्रियमाणोऽपि म्रिये न तु प्रतिज्ञाहानिं करोमि' इति निगदितस्तदभिप्रायविधारणात्स तस्मै यक्षीनिरूपितवृत्तांतमकथयत् । सोऽपि तदाकर्णनादहिंसादिश्रावकव्रतमविकलमादाय जीवितांते सौधर्मकल्पे देवोऽभवत् । शूरवीरश्च तस्य परलोकक्रियावसान उपगच्छन् यक्षीं निरीक्ष्य कथय स किं मे मैथुनस्तव पतिरजायतेति परिपृष्टा साऽवोचत् । स्वीकृतसमस्तव्रतसंग्रहस्यामुख्यव्यंतरगतिपराङ्मुखस्य सौधर्मकल्पे समुत्पत्तिरासीत्, ततो मदधिपत्वप्रच्युतः प्रकृष्टदिव्यभोगमनुभवतीति हृदयगततद्वचनार्थनिश्चितमतिरहो व्रतप्रभावः समभिलषितफलप्रदानसमर्थ इति समाधिगुप्तिमुनिसमीपे परिगृहीतश्रावकव्रतो बभूव । खदिरसारो द्विसागरोपमकालं दिव्यभोगमनुभूय समनुष्ठितभोगनिदानः स्वजीवितांते ततः प्रच्युतः प्रत्यंतपुरे

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

सुमित्रनामा मित्रराज्ञः पुत्रोऽभूत् । निर्दर्शनतपः कृत्वा व्यंतर आसीत्ततः कुणिकनरपतेः श्रीमतीदेव्याश्च श्रेणिकोऽभूदिति । एवं दृष्टादृष्टफलस्याप्यहितं मांसम् ।

मद्यपस्य हिताहितविवेकता वाच्यावाच्यता गम्यागम्यता कार्याकार्यं च नास्ति । मद्यमुपसेविनो जनस्य स्मृतिं विनाशयति, विनष्टस्मृतिकः किं न करोति, किं न भाषते, कमुन्मार्गं न गच्छति, सर्वदोषाणामास्पदं तदेव तस्याख्यानम् ।

तथा हि—कश्चिद्ब्राह्मणो गुणी गंगास्नानार्थं गच्छन्नटवीप्रदेशे प्रहसनशीलेन मदिरामदोन्मत्तेन कांतासहितशबरेण स निरुध्य मांसभक्षणसुरापानशबरीसंसर्गेषु भवताऽन्यतममंगीकरणीयमन्यथा भवंतं व्यापादयामीत्युक्तः किंकर्त्तव्यतामूढः, प्राण्यंगत्वान्मांसभक्षणे पापोपलेपो भवति, शबरीसंसर्गे जातिनाशः संजायते, पिष्टोदकगुडधातक्यादिसमुत्पन्नं निरवद्यं मद्यमिदं पिबामीति पीत्वा विनष्टस्मृतिरगम्यगमनमभक्ष्यभक्षणं च कृतवान् । तथा हि—मद्यपायिनामपराधेन द्वीपायनमुनिकोपाद्भस्मीभूतायां द्वारवत्यां विनष्टा यादवा इति ।

मत्तो हिनस्ति सर्वं मिथ्या प्रलपति विवेकविकलतया ।
मातरमपि कामयते सावद्यं मद्यमत एव ॥

सामायिकः संध्यात्रयेऽपि भुवनत्रयस्वामिनं वंदमानो वक्ष्यमाण व्युत्सर्गतपसि कथितक्रमेण ।

द्विनिषण्णं यथाजातं द्वादशावर्त्तमित्यपि ।
चतुर्नति त्रिशुद्धं च कृतिकर्म प्रयोजयेत् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्य सामायिकस्यानंतरोक्तशीलसप्तकांतर्गतं सामायिकं व्रतं व्रतिकस्य शीलं भवतीति।

प्रोषधोपवासः मासे मासे चतुर्ष्वपि पर्वदिनेषु स्वकीयां शक्तिमनिगूह्य प्रोषधनियमं मन्यमानो भवतीति व्रतिकस्य यदुक्तं शीलं प्रोषधोपवासस्तदस्य व्रतमिति।

सचित्तव्रतो दयामूर्तिर्मूलफलशाखाकरीरकंदपुष्पबीजादीनि न भक्षयत्यस्योपभोगपरिभोगपरिमाणशीलव्रतातिचारो व्रतं भवतीति।

रात्रिभक्तव्रता रात्रौ स्त्रीणां भजनं रात्रिभक्तं तद्व्रतयति सेवत इति रात्रिव्रतातिचारा रात्रिभक्तव्रतः दिवाब्रह्मचारीत्यर्थः। ब्रह्मचारी शुक्रशोणितबीजं रसरुधिरमांसमेदोऽस्थिमज्जाशुक्रसप्तधातुमयमनेकस्रोतोविलं मूत्रपुरीषभाजनं कृमिकुलाकुलं विविधव्याधिविधुरमपायप्रायं कृमिभस्मविष्टापर्यवसानमंगमित्यनंगाद्विरतो भवति।

आरंभविनिवृत्तोऽसिमसिकृषिवाणिज्यप्रमुखादारंभात्प्राणातिपातहेतोर्विरतो भवति। परिग्रहविनिवृत्तः क्रोधादिकषायाणामार्त्तरौद्रयोर्हिंसादिपंचपापानां भयस्य च जन्मभूमिः, दूरोत्सारितधर्म्यशुक्लः परिग्रह इति मत्वा दशविधबाह्यपरिग्रहाद्विनिवृत्तः स्वच्छः संतोषपरो भवति।

अनुमतिविनिवृत्त आहारादीनामारंभाणामनुमननाद्विनिवृत्तो भवति।

उद्दिष्टविनिवृत्तः स्वोद्दिष्टपिंडोपधिशयनवसनादेर्विरतः सत्त्वैकशाटकधरो भिक्षाशनः पाणिपात्रपुटेनोपविश्य भोजी रात्रिप्रतिमादितपः समुद्यत आतापनादियोगरहितो भवति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणुव्रतिमहाव्रतिनौ समितियुक्तौ संयमिनौ भवतः समितिं विना विरतौ । तथा चोक्तं वर्गणाखंडस्य बंधनाधिकारे—

संजमविरइणं को भेदो, ससमिदिमहव्वयाणुव्वयाइं संजमो, समदीहिं विणा महव्वयाणुव्वयाइं विरदी ॥ इति—

आद्यास्तु षट् जघन्याः स्युर्मध्यमास्तदनु त्रयः ।
शेषौ द्वावुत्तमावुक्तौ जैनेषु जिनशासने ॥

असिमषिकृषिवाणिज्यादिभिर्गृहस्थानां हिंसासंभवेऽपि पक्षचर्यासाधकत्वैर्हिंसाऽभावः क्रियते । तत्राहिंसापरिणामत्वं पक्षः । धर्मार्थं देवतार्थं मंत्रसिद्ध्यर्थमौषधार्थमाहारार्थं स्वभोगार्थं च गृहमेधिनो हिंसां न कुर्वन्ति । हिंसासंभवे प्रायश्चित्तविधिना विशुद्धः सन् परिग्रहपरित्यागकरणे सति स्वगृहं धर्मं च वंश्याय समर्प्य यावद्गृहं परित्यजति तावदस्य चर्या भवति । सकलगुणसंपूर्णस्य शरीरकंपनोच्छ्वासनोन्मीलनविधिं परिहरमाणस्य लोकाग्रमनसः शरीरपरित्यागः साधकत्वमेवं पक्षादिभिस्त्रिभिर्हिंसाद्युपचितं पापमपगतं भवति ।

जैनागमे चत्वार आश्रमाः—उक्तं चोपासकाध्ययने ।

ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
इत्याश्रमास्तु जैनानां सप्तमांगाद्विनिःसृताः ॥

तत्र ब्रह्मचारिणः पंचविधाः—उपनयावलंबादीक्षागूढनैष्ठिकभेदेन । तत्रोपनयब्रह्मचारिणो गणधरसूत्रधारिणः समभ्यस्तागमा गृहधर्मानुष्ठायिनो भवंति । अवलंबब्रह्मचारिणः क्षुल्लकरूपेणागममभ्यस्य परिगृहीतगृहावासा भवंति । अदीक्षाब्रह्मचारिणः वेषमंतरेणाभ्यस्तागमा गृहधर्मनिरता भवंति । गूढब्रह्मचारिणः कुमारश्रमणाः संतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वीकृतागमाभ्यासा बंधुभिर्दुःसहपरीषहैरात्मना नृपतिभिर्वा निरस्तपरमेश्वररूपा गृहवासरता भवंति । नैष्ठिकब्रह्मचारिणः समाधिगतशिखालक्षितशिरोलिंगाः गणधरसूत्रोपलक्षितोरोलिंगाः, शुक्लरक्तवसनखंडकौपीनलक्षितकटीलिंगाः स्नातका भिक्षावृत्तयो देवतार्चनपरा भवंति ।

गृहस्थस्येज्या, वार्ता, दत्तिः, स्वाध्यायः, संयमः, तप इत्यार्यषट्कर्माणि भवंति । तत्रार्हत्पूजेज्या, सा च नित्यमहश्चतुर्मुखं कल्पवृक्षोऽष्टाह्निक ऐन्द्रध्वज इति । तत्र नित्यमहो नित्यं, यथाशक्ति जिनगृहेभ्यो निजगृहाद्गंधपुष्पाक्षतादिनिवेदनं, चैत्यचैत्यालयं कृत्वा ग्रामक्षेत्रादीनां शासनदानं मुनिजनपूजनं च भवति । चतुर्मुखं मुकुटवद्धैः क्रियमाणा पूजा सैव महामहः सर्वतोभद्र इति । कल्पवृक्षोर्थिनः प्रार्थितार्थैः संतर्प्य चक्रवर्त्तिनि क्रियमाणो महः । अष्टान्हिकं प्रतीतं । ऐन्द्रध्वज इंद्रादिभिः क्रियमाणः बलिस्नपनं संध्यात्रयेऽपि जगत्रयस्वामिनः पूजाऽभिषेककरणम् । पुनरप्येषां विकल्पा अन्येऽपि पूजाविशेषाः सन्तीति । वार्त्ताऽसिमषिकृषिवाणिज्यादिशिल्पकर्मभिर्विशुद्धवृत्त्याऽर्थोपार्जनमिति । दत्तिः दयापात्रसमसकलभेदाच्चतुर्विधा । तत्र दयादत्तिरनुकंपयाऽनुग्राह्येभ्यः प्राणिभ्यस्त्रिशुद्धिभिरभयदानम् । पात्रदत्तिर्महातपोधनेभ्यः प्रतिग्रहार्चनादिपूर्वकं निरवद्याहारदानं ज्ञानसंयमोपकरणादिदानं च । समदत्तिः स्वसमक्रियाय मित्राय निस्तारकोत्तमाय कन्याभूमिसुवर्णहस्त्यश्वरथरत्नादिदानं, स्वसमानाभावे मध्यमपात्रस्यापि दानम् । सकलदत्तिरात्मीयस्वसंततिस्थापनार्थं पुत्राय गोत्रजाय वा धर्मं धनं च समर्प्य प्रदान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्वयवृत्तिश्च सैव। स्वाध्यायस्तत्त्वज्ञानस्याध्ययनमध्यापनं स्मरणं च। संयमः पंचाणुव्रतप्रवर्त्तनम्। तपोऽनशनादिद्वादशविधानुष्ठानम्।

इत्यार्यषट्कर्म्मनिरता गृहस्था द्विविधा भवंति। जातिक्षत्रियास्तीर्थक्षत्रियाश्चेति। तत्र जातिक्षत्रियाः क्षत्रियब्राह्मणवैश्यशूद्रभेदाच्चतुर्विधाः। तीर्थक्षत्रियाः स्वजीवनविकल्पादनेकधा भिद्यंते।

वानप्रस्था अपरिगृहीतजिनरूपा वस्त्रखंडधारिणो निरतिशयतपःसमुद्यता भवन्ति।

भिक्षवो जिनरूपधारिणस्ते बहुधा भवंति। अनगारा यतयो मुनय ऋषयश्चेति। तत्रानगाराः सामान्यसाधव उच्यन्ते। यतय उपशमक्षपकश्रेण्यारूढा भण्यन्ते। मुनयोऽवधिमनःपर्ययकेवलज्ञानिनश्च कथ्यन्ते। ऋषय ऋद्धिप्राप्तास्ते चतुर्विधाः, राजब्रह्मदेवपरमभेदात्। तत्र राजर्षयो विक्रियाऽक्षीणर्द्धिप्राप्ता भवंति। ब्रह्मर्षयो बुद्ध्यौषधिऋद्धियुक्ताः कीर्त्यन्ते। देवर्षयो गगनगमनर्द्धिसंयुक्ताः कथ्यन्ते। परमर्षयः केवलज्ञानिनो निगद्यंते।

अपि च।

देशप्रत्यक्षवित्केवलभृदिह मुनिः स्यादृषिः प्रोद्गतर्द्धि—
रारूढश्रेणियुग्मोऽजनि यतिरनगारोऽपरः साधुरुक्तः।
राजा ब्रह्मा च देवः परम इति ऋषिर्विक्रियाऽक्षीणशक्ति—
प्राप्तो बुद्ध्यौषधीशो वियदयनपटुर्विश्ववेदी क्रमेण॥

उच्चैरुपासकैर्मारणान्तिकी सल्लेखना प्रीत्या सेव्या। स्वपरिणामोपात्तस्यायुष इन्द्रियाणां बलानामुच्छ्वासनिःश्वासस्य च कदलीघातस्वपाकच्युतिकारणवशात्संक्षयो मरणं, तच्च द्विविधं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नित्यमरणं तद्भवमरणं चेति । तत्र नित्यमरणं समये समये स्वायुरादीनां निवृत्तिः । तद्भवमरणं भवांतरप्राप्तिरनन्तरोपश्लिष्टपूर्वभवविगमनम् । अत्र पुनस्तद्भवमरणं ग्राह्यं मरणान्तः प्रयोजनमस्या इति मारणांतिकी । बाह्यस्य कायस्याभ्यंतराणां कषायानां तत्कारणहापनया क्रमेण सम्यग्लेखना सल्लेखना । उपसर्गे दुर्भिक्षे जरसि निःप्रतिक्रियायां धर्मार्थं तनुत्यजनं सल्लेखना । ततो नित्यप्रार्थितसमाधिमरणे यथाशक्ति प्रयत्नं कृत्वा शीतोष्णाद्युपश्लेषे सति तपःस्थो यथा शीतोष्णादौ हर्षविषादं न करोति तथा सल्लेखनां कुर्वाणः शीतोष्णादौ हर्षविषादमकृत्वा स्नेहं संगवैरादिकं परिग्रहं च परित्यज्य विशुद्धचित्तः स्वजनपरिजने क्षन्तव्यं निःशल्यं च प्रियवचनैर्विधाय विगतमानकषायः कृतकारितानुमतमेनः सर्वमालोच्य गुरौ महाव्रतमामरणमारोप्यारतिदैन्यविषादभयकालुष्यादिकमपहाय सत्त्वोत्साहमुदीर्य श्रुतामृतेन मनः प्रसाद्य क्रमेणाहारं परिहाय ततः स्निग्धपानं तदनन्तरं खरपानं तदनु चोपवासं कृत्वा गुरोः पादमूले पंचनमस्कारमुच्चारयन्पंचपरमेष्ठिनां गुणान्स्मरन्सर्वयत्नेन तनुं त्यजेदियं सल्लेखना संयतस्यापि ।

अथ सल्लेखनाया मरणविशेषोत्पादनसमर्थाया असंक्लिष्टचित्तेनारभ्यायाः पंचातीचारा भवन्ति । जीविताशंसा, मरणाशंसा, मित्रानुरागः, सुखानुबन्धः, निदानं चेति । तत्र शरीरमिदमवश्यं हेयं जलबुद्बुदवदनित्यमस्यावस्थानं कथं स्यादित्यादरो जीविताशंसा । आशंसाऽऽकांक्षणमभिलाष इत्यनर्थान्तरं । रोगोपद्रवाकुलतया प्राप्तजीवनसंक्लेशस्य मरणं प्रति चित्तप्रणिधानं मरणाशंसा । व्यसने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहायत्वमुत्सवे संभ्रम इत्येवमादि सुकृतं बाल्ये सह पांशुक्रीडनमित्येवमादीनामनुस्मरणं मित्रानुरागः। एवं मया भुक्तं शयितं क्रीडितमित्येवमादि प्रीतिविशेषं प्रति स्मृतिसमन्वाहारः सुखानुबन्धः। विषयसुखोत्कर्षाभिलाषभोगाकांक्षतया नियतं चित्तं दीयते तस्मिन् तेनेति वा निदानमिति ॥

इति श्रीमच्चामुंडरायप्रणीते भावनासंग्रहे चारित्रसारे सागारधर्मः

समाप्तोऽयम्।

षोडशभावनाप्रकरणम्।

उच्चैरेकादशोपासकैर्वक्ष्यमाणदशधर्माधारैश्च मनुष्यगतौ केवलज्ञानोपलक्षितजीवद्रव्यसहकारिकारणसंबंधप्रारंभस्यानंतानुपमप्रभावस्याचिन्त्यविशेषविभूतिकारणस्य त्रैलोक्यविजयकरस्य तीर्थकरनामगोत्रकर्मणः कारणानि षोडश भावना भावयितव्या इति। तद्यथा— दर्शनविशुद्धता, विनयसंपन्नता, शीलव्रतेष्वनतीचारः, अभीक्ष्णज्ञानोपयोगः, संवेगः, शक्तितस्त्यागः, शक्तितस्तपः, साधुसमाधिः, वैयावृत्त्यकरणं, अर्हद्भक्तिः, आचार्यभक्तिः, बहुश्रुतभक्तिः, प्रवचनभक्तिः, आवश्यकापरिहाणिः, मार्गप्रभावना, प्रवचनवात्सल्यमिति। तत्र जिनोपदिष्टे नैर्ग्रन्थ्ये मोक्षवर्त्मनि रुचिः सम्यग्दर्शनं, विशुद्धिं विना दर्शनमात्रादेव तीर्थकरनामकर्मबंधो न भवति, त्रिमूढापोढाष्टमदादिरहितत्वात्। उपलब्धनिजस्वरूपस्य सम्यग्दर्शनस्य प्रथमद्वितीयोपशमकवेदकक्षायिकान्यतमविशिष्टस्य ज्ञानदर्शनतपश्चारित्रेषु त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्धत्सु च विनये, अभीक्ष्णज्ञानोपयोगसंवेगयुक्तत्वे, साधुभ्यः प्रासुकप्रदाने, द्वादशविधतपसि, साधूनां समाधिवैयावृत्त्यकरणे, अर्हत्सु व्रतशीलावश्यकसंपन्नाचार्येषु च बहुश्रुतेषु प्रवचने च भक्तौ, प्रवचनप्रभावने, प्रवचनवत्सलत्वे प्रवर्त्तनं विशुद्धता । एकाऽपि सा दर्शनविशुद्धता तीर्थकरनामबंधस्य कारणं भवति, शेषभावनानां तत्रैवान्तर्भावादिति दर्शनविशुद्धता व्याख्याता । सम्यग्दर्शनादिषु मोक्षसाधनेषु तत्साधकेषु गुर्वादिषु च स्वयोग्यवृत्त्या सत्कार आदरः कषायनोकषायनिवृत्तिर्वा विनयसम्पन्नता । अहिंसादिषु व्रतेषु तत्परिपालनार्थेषु च क्रोधवर्जनादिषु शीलेषु निरवद्या वृत्तिः कायवाङ्मनसा शीलव्रतेष्वनतिचार इति । मत्यादिविकल्पं ज्ञानं जीवादिपदार्थस्वतत्त्वविषयं प्रत्यक्षपरोक्षलक्षणमज्ञाननिवृत्त्यव्यवहितफलं हिता-हितानुभयप्राप्तिपरिहारोपेक्षाव्यवहितफलं यत्तस्य भावनायां नित्ययुक्तताऽभीक्ष्णज्ञानोपयोग इति । शारीरं मानसं च बहुविकल्पं प्रियविप्रयोगाप्रियसंयोगेप्सितालाभादिजनितं संसारदुःखं यदतिकष्टं ततो नित्यभीरुता संवेग इति । आहारो दत्तः पात्राय तस्मिन्नहनि तत्प्रीतिहेतुर्भवति; अभयदानमुपपादितमेकभवव्यसननोदनकरं, सम्यग्ज्ञानदानं पुनरनेकभवशतसहस्रदुःखोत्तारणकारणमतस्त्रिविधहाराभयज्ञानदानभेदेन यथाविधि प्रतिपाद्यमानं त्याग इत्युच्यते । शरीरमिदं दुःखकारणमनित्यमशुचि नास्य यथेष्टं भोगविधिना परिपोषो युक्तः, अशुच्यपीदं गुणरत्नसंचयोपकारीति विचिन्त्य विनिवृत्तविषयसुखाभिषंगस्य कार्यं प्रत्येतद्भृतकमिव नियुंजानस्य यथाशक्तिमार्गाविरोधकाय क्लेशानुष्ठानं तप इति । यथा भाण्डागारे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुत्थिते दहने तत्प्रशमनमनुष्ठीयते बहूपकारित्वात्तथाऽनेकव्रत-सम्रद्धस्य मुनिगणस्य तपसः कुतश्चित्प्रत्यूहे समुपस्थिते तत्संधारणं साधुसमाधिरिति । गुणवतः साधुजनस्य संनिहिते दुःखे निरवद्येन विधिना तदपहरणं बहुप्रकारं वैयावृत्त्यमिति । अर्हदाचार्येषु केवल-श्रुतज्ञानदिव्यनयनेषु परहितकरप्रवृत्तिषु स्वपरसमयविस्तरनिश्चय-ज्ञेषु बहुश्रुतेषु प्रवचने च श्रुतदेवतासंनिधिगुणयोगदुरासदे मोक्ष-पदप्रासादारोहणसुरचितसोपानभूते भावविशुद्धियुक्तोऽनुरागो भक्ति-स्त्रिधा कल्प्यत इति । षडावश्यकक्रियाः, सामायिकं, चतुर्विंशति-स्तवः, वंदना, प्रतिक्रमणं, प्रत्याख्यानं, कायोत्सर्गश्चेति । तत्र सामायिकं सर्वसावद्ययोगनिवृत्तिलक्षणं, चित्तस्यैकत्वेन ज्ञानेन प्रणि-धानं वा, शत्रुमित्रमणिपाषाणसुवर्णमृत्तिकाजीवितमरणलाभालाभा-दिषु रागद्वेषाभावो वेति । चतुर्विंशतिस्तवस्तीर्थंकरपुण्यगुणानु-कीर्त्तनमिति । वंदना त्रिशुद्धिः द्व्यासनश्चतुःशिरोवनतिर्द्वादशा-वर्त्तना चेति, तत्प्रपंचस्तूत्तरत्र वक्ष्यते । प्रतिक्रमणमतीतदोषनि-वर्त्तनमिति । प्रत्याख्यानमनागतदोषापोहनमिति । कायोत्सर्गः परिमितकालविषयशरीरममत्वनिवृत्तिरिति । एतासां षण्णां क्रियाणा यथाकालं प्रवर्त्तनमनौत्सुक्यमावश्यकापरिहाणिरिति । ज्ञानतपो-जिनपूजाविधिना धर्मप्रकाशनं मार्गप्रभावनेति । प्रकृष्टं वचनं प्रव-चनं, प्रकृष्टस्य वा वचनं प्रवचनं, सिद्धान्तो द्वादशाङ्गमित्यनर्था-न्तरं, तत्र भवा देशमहाव्रतिनः, असंयतसम्यग्दृष्टयश्च प्रवचनमि-त्युच्यते, तेष्वनुराग आकांक्षा ममेदं भावः प्रवचनवत्सलत्वं । तेनैकेनापि तीर्थंकरनामकर्मबंधो भवति । कुतः पंचमहाव्रताद्या-

गमार्थविषयस्योत्कृष्टानुरागस्य दर्शनविशुद्ध्यादिपंचदशस्वविनाभावात् । एवं षोडश भावनाः स्युः । एकैकस्यां भावनायामविनाभाविन्य इतरपंचदश भावनाः । तेन सम्यग्भाव्यमानानि व्यस्तानि समस्तानि वा तीर्थकरनामकर्मास्त्रवकारणानि भवंति । असंयतसम्यग्दृष्टित अपूर्वकरणस्य पदे षट् सप्त भागा यावत् ।

इति श्रीमच्चामुंडरायप्रणीते चारित्रसारे षोडशभावनावर्णनं समाप्तम् ।

अनगारधर्मवर्णनम् ।

इदानीमनगारधर्म उच्यते, स चोत्तमक्षमामार्दवाऽऽर्जवसत्यशौचसंयमतपस्त्यागाकिञ्चन्यब्रह्मचर्यभेदेन दशविधः । उत्तमग्रहणं ख्यातिपूजादिनिवृत्त्यर्थं, तत्प्रत्येकमभिसम्बध्यते, उत्तमक्षमा, उत्तममार्दवमित्यादि । मोक्षमार्गे प्रवर्त्तमानस्य प्रमादपरिहारार्थं दशविधधर्माख्यानम् ।

तपोबृंहणकारणशरीरस्थितिनिमित्तं निरवद्याहारान्वेषणार्थं परगृहाण्युपसर्पतो भिक्षोर्दुष्टजनाक्रोशनोत्प्रहसनाऽवज्ञाऽनुताडनशरीरव्यापादनादीनां क्रोधोत्पत्तिनिमित्तानां संनिधाने कालुष्याभावः क्षमेत्युच्यते । उत्तमक्षमाया व्रतशीलपरिरक्षणमिहामुत्र दुःखानभिष्वंगः सर्वस्य जगतः सन्मानसत्कारलाभप्रसिद्ध्यादिश्च गुणस्तत्प्रतिपक्षस्य क्रोधस्य धर्मार्थकाममोक्षप्रणाशनं दोष इति विचिन्त्य क्षंतव्यं । क्रोधनिमित्तस्यात्मनि भावाभावानुचिंतनात्परैः प्रयुक्तस्य क्रोधनिमित्तस्यात्मनि भावानुचिंतनात्तावद्विद्यंते मय्येते दोषाः किमत्रासौ मिथ्या

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

ब्रवीतीति क्षन्तव्यं । अभावचिंतनादपि नैते मयि विद्यन्ते दोषा अज्ञानादसौ ब्रवीतीति क्षमा कार्या । अपि च बालस्वभावचिन्तनं प्रत्यक्षपरोक्षाक्रोशनताडनमारणधर्मभ्रंशनानामुत्तरोत्तररक्षणार्थं, तद्यथा—परोक्षमाक्रोशति बाले क्षन्तव्यमेवं स्वभावा हि बालाः भवन्ति, दिष्ट्या च स मां परोक्षमाक्रोशति न च प्रत्यक्षमेतदपि बालेष्विति लाभो मन्तव्य एव । प्रत्यक्षमाक्रोशति सोढव्यं, विद्यत एतद्बालेषु दिष्ट्या च मां प्रत्यक्षमाक्रोशति, यन्न ताडयत्येतदपि बालेष्विति लाभ एव मंतव्यः । ताडयत्यपि मर्षितव्यं, दिष्ट्या च मां ताडयति न प्राणैर्वियोजयति । एतदपि बालेष्विति लाभ एव मन्तव्यः । प्राणैर्वियोजयत्यपि तितिक्षा कर्त्तव्या, दिष्ट्या च मां प्राणैर्वियोजयति, मदधीनाद्धर्मान्न भ्रंशयतीति । किञ्चान्यन्ममैवापराधोऽयं यत्पुराऽऽचरितं तन्महद्दुष्कर्म तत्फलमिदमाक्रोशवचनादिनिमित्तमात्रं परोऽयमत्रेति सोढव्यमिति ।

उत्तमजातिकुलरूपविज्ञानैश्वर्यश्रुतजपतपोलाभवीर्यस्यापि तत्कृतमदावेशाभावात्परप्रयुक्तमपरिभवनिमित्ताभिमानाभावो मार्दवं माननिर्हरणमवगन्तव्यम् । मार्दवोपेतं गुरवोऽनुगृह्णंति, साधवोऽपि साधु मन्यन्ते । ततश्च सम्यग्ज्ञानादीनां पात्रं भवति, अतः स्वर्गापवर्गफलावाप्तिर्मानमलिनमनसि व्रतशीलानि नावतिष्ठन्ते, साधवश्चैनं परित्यजन्ति, तन्मूलाः सर्वा विपत्तय इति ।

योगस्य कायवाङ्मनोलक्षणस्यावक्रताऽऽर्जवमित्युच्यते । ऋजुहृदयमधिवसन्तो गुणा मायाभावं नाश्रयन्ते, मायाविनो न विश्वासिति लोकः गर्हिता च गतिर्भवतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकर्षप्राप्तलोभानिवृत्तिः शौचमित्युच्यते । शुच्याचारमिहापि सन्मानयन्ति सर्वे, विश्रंभणादयश्च गुणास्तमधितिष्ठन्ति । लोभभावनाक्रान्तहृदये नावकाशं लभन्ते गुणाः । स च लोभो जीविताऽऽरोग्येन्द्रियोपभोगविषयभेदाच्चतुर्विधः, स्वपरविषयावात्स प्रत्येकं द्विधा भिद्यते । स्वजीवितलोभः, परजीवितलोभः, स्वारोग्यलोभः, परारोग्यलोभः, स्वेन्द्रियलोभः, परेन्द्रियलोभः, स्वोपभोगलोभः, परोपभोगलोभश्चेति । अतस्तन्निवृत्तिलक्षणं शौचं चतुर्विधमिति ।

सत्सु प्रशस्तेषु जनेषु साधुवचनं सत्यमित्युच्यते । सत्यसद्भावो दशविधः, नामरूपस्थापनाप्रतीत्यसंवृत्तिसंयोजनाजनपददेशभावसमयसत्यभेदेन । तत्र सचेतनेतरद्रव्यस्यासत्यप्यर्थे यद्व्यवहारार्थं संज्ञाकरणं तन्नामसत्यं, इन्द्र इत्यादि । यदर्थासन्निधानेऽपि रूपमात्रेणोच्यते तद्रूपसत्यं, यथा चित्रपुरुषादिषु । असत्यपि चैतन्ययोगादावर्थे पुरुष इत्यादि, असत्यप्यर्थे यत्कार्यार्थं स्थापितं द्यूताक्षरसारिकानिक्षेपादिषु तत्स्थापनासत्यं, चन्द्रप्रभप्रतिमा इति । साद्यनादीनौपशमिकादीन् भावान् प्रतीत्य यद्वचनं तत्प्रतीत्यसत्यं, दीर्घोऽयं पुरुषस्ताल इत्यादि । यल्लोकसंवृत्या गीतं वचस्तत्संवृतिसत्यं, यथा पृथिव्याद्यनेककारणत्वेऽपि सति पङ्के जातं पंकजमित्यादि । धूपचूर्णवासनानुलेपनप्रघर्षादिषु पद्ममकरहंससर्वतोभद्रक्रौंचव्यूहादिषु वाऽचेतनेतरद्रव्याणां यथाभागविधानं संनिवेशाविर्भावकं यद्वचस्तत्संयोजनासत्यम् । द्वात्रिंशज्जनपदेष्वार्यानार्यभेदेषु धर्मार्थकाममोक्षाणां प्रापकं यद्वचस्तज्जनपदसत्यं, राजाराणकमित्यादि । ग्रामनगरराजगणपाखंडजातिकुलादिधर्माणामुपदेशकं यद्वचस्तद्देशसत्यं, ग्रामो

वृत्याऽऽवृत इत्यादि । छद्मस्थज्ञानस्य द्रव्ययाथात्म्यादर्शनेऽपि संयतस्य संयतासंयतस्य वा स्वगुणपरिपालनार्थं प्रासुकमिदमप्रासुकमित्यादि यद्वचस्तद्भावसत्यं । प्रतिनियतषट्द्रव्यपर्यायाणामागमगम्यानां याथात्म्याऽऽविष्करणं यद्वचस्तत्समयसत्यं, समयोत्तरवृद्ध्या बालो युवा पल्योपम इत्यादि । सत्यवाचि प्रतिष्ठिताः सर्वगुणसम्पदः; अनृताभिभाषिणं बन्धवोऽप्यवमन्यन्ते, मित्राणि च विरक्तभावमुपयान्ति, विषाग्न्युदकादीन्यप्येनं न सहन्ते, जिह्वाच्छेदसर्वस्वहरणादिव्यसनभाग्भवतीति ।

संयमो द्विधा—उपेक्षाऽपहृतभेदेन । तत्र देशकालविधानज्ञस्य परानुपरोधेनोत्कृष्टकायस्य कायवाङ्मनःकर्मयोगानां कृतनिग्रहस्य त्रिगुप्तिगुप्तस्य रागद्वेषानभिष्वंगलक्षण उपेक्षासंयमः । अपहृतसंयमस्य समितयः कार्यास्ता उच्यन्ते, ईर्याभाषैषणाऽऽदाननिक्षेपोत्सर्गाः समितयः । तत्रेर्यासमितिर्नामकर्मोदयाऽऽपादितविशेषैकद्वित्रिचतुःपंचेंद्रियभेदेन चतुर्द्विर्द्विर्द्विश्चतुर्विकल्पचतुर्दशजीवस्थानादिविधानवेदिनो मुनेर्धर्मार्थं प्रयतमानस्य सवितर्युदिते चक्षुषोर्विषयग्रहणसामर्थ्यमुपजनयतः मनुष्यहस्त्यश्वशकटगोकुलादिचरणपातोपहतावश्याय प्रालेयमार्गेऽनन्यमनसः शनैर्न्यस्तपादस्य संकुचितावयवस्योत्सृष्टपार्श्वदृष्टेर्युगमात्रपूर्वनिरीक्षणावहितलोचनस्य स्थित्वा दिशो विलोकयतः पृथिव्याद्यारंभाभावादीर्यासमितिरित्याख्यायते । हितमितासंदिग्धाभिधानं भाषासमितिः मोक्षपदप्रापणप्रधानफलं हितं, तद्द्विविधं, स्वहितं, परहितं चेति । मितमनर्थकबहुप्रलपनरहितं । स्फुटार्थं व्यक्ताक्षरं वाऽसंदिग्धत्वं । तस्याः प्रपंचो मिथ्याभिधानासूयाप्रियसंभे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दाल्पसारशंकितभ्रांतसकषायपरिहासायुक्तासभ्यशपनानिष्ठुरधर्मविरो-
धिदेशकालविरोध्यतिसंस्तवादिवाग्दोषविरहिताभिधानम् । अनगारस्य
मोक्षैकप्रयोजनस्य प्राणिदयातत्परस्य कायस्थित्यर्थं प्राणयात्रा-
निमित्तं तपोबृंहणार्थं च चर्यानिमित्तं पर्यटतः शीलगुणसंयमा-
दिकं संरक्षतः संसारशरीरभोगनिर्वेदत्रयं भावयतो दृष्टवस्तुयाथात्म्य-
स्वरूपं चिन्तयतो देशकालसामर्थ्यादिविशिष्टमगर्हितमभ्यवहरणं
नवकोटिपरिशुद्धमेषणासमितिः । षट्जीवनिकायस्योपद्रव उपद्रवणं,
अंगच्छेदनादिव्यापारो विद्रावणं, संतापजननं परितापनं, प्राणि-
प्राणव्यपरोपणमारंभः, एवमुपद्रवणाविद्रावणपरितापनारंभक्रियया
निष्पन्नमन्नं स्वेन कृतं परेण कारितं वाऽनुमानितं वाऽधःकर्म (जनितं)
तत्सेविनोऽनशनादितपांस्यभ्रावकाशादियोगा वीरासनादियोगविशे-
षाश्च भिन्नभाजनभरितामृतवत्प्रक्षरन्ति, ततश्च तदभक्ष्यमिव परिहरतो
भिक्षोः परकृतप्रशस्तप्रासुकाऽऽहारग्रहणेऽपि षट्चत्वारिंशद्दोषा
भवन्ति तद्यथा—षोडशविधा उद्गमदोषाः, षोडशविधा उत्पा-
दनदोषाः, दशविधा एषणादोषाः संयोजनाप्रमाणाङ्गारधूमदोषा-
श्चत्वारः, एतैर्दोषैः परिवर्जितमाहारग्रहणमेषणासमितिरिति । नैःस-
ङ्गिकीं चर्यामातिष्ठमानस्य पात्रग्रहणे सति तत्संरक्षणादिकृतो दोषः
प्रसज्यते । कपालमन्यद्वा भाजनमादाय पर्यटतो भिक्षोर्दैन्य-
मासज्यते । गृहिजनानीतमपि भाजनं न सर्वत्र सुलभं तत्प्रक्षालना-
दिविधौ च दुःपरिहारः पापलेपः । स्वभाजनेन देशान्तरं नीत्वा
भोजने चाशानुबन्धनं स्यात् स्वपूर्वविशिष्टभाजनाधिकगुणासंभवाच्च ।
न केनचिद्भुंजानस्य दैन्यं स्यात् । ततो निःसंगस्य निष्परि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रहस्य भिक्षोः स्वकरपुटभाजनान्नान्यद्विशिष्टमत्तिस्तस्मात्स्वायत्तेन पाणिपुटेन निराबाधे देशे निरालंबचतुरंगुलान्तरसमपादाभ्यां स्थित्वा परीक्ष्य भुंजानस्य निभृतस्य तद्गतदोषाभावः । धर्माविरोधिनां परानुपराधिनां द्रव्याणां ज्ञानादिसाधनानां ग्रहणे विसर्जने च निरीक्ष्य प्रमृज्य प्रवर्त्तनमादाननिक्षेपणसमितिः । स्थावराणां जंगमानां च जीवानामविरोधेनांगमलनिर्हरणं शरीरस्य च स्थापनमुत्सर्गसमितिः । एवं गमनभाषणाभ्यवहरणग्रहणनिक्षेपोत्सर्गलक्षणपंचसमितिविधाने-ऽप्रमत्तानां तत्प्रणालिकाप्रसृतकर्माऽभावान्निभृतानां संवरः सिद्ध्यति ।

एवमीर्यासमित्यादिषु वर्तमानस्य मुनेस्तत्प्रतिपालनार्थं प्राणी-न्द्रियपरिहारोऽपहृतसंयमः । एकेंद्रियादिप्राणिपीडापरिहारः प्राण-संयमः । इन्द्रियादिष्वर्थेषु रागानिभिष्वङ्ग इन्द्रियसंयमः । स चाप-हृतसंयमस्त्रिविधः, उत्कृष्टो मध्यमो जघन्यश्चेति । तत्र प्रासुकव-सत्याहारमात्रबाह्यसाधनस्य स्वाधीनेतरज्ञानचरणकरणस्य बाह्यजन्तू-पनिपात आत्मानं ततोऽपहृत्य जीवान्परिपालयत उत्कृष्टः । मृदुना प्रमृज्य जन्तून्परिहरतो मध्यमः । उपकरणान्तरेच्छया जघन्यः ।

तस्यापहृतसंयमस्य प्रतिपालनार्थं शुद्ध्यष्टकोपदेशः । तद्यथा— अष्टौ शुद्धयः । भावशुद्धिः, कायशुद्धिः, विनयशुद्धिः, ईर्यापथ-शुद्धिः, भिक्षाशुद्धिः, । प्रतिष्ठापनाशुद्धिः, शयनाशनशुद्धिः, वाक्यशुद्धिश्चेति । तत्र भावशुद्धिः कर्मक्षयोपशमजनिता मोक्ष-मार्गरुच्याहितप्रसादा रागाद्युपप्लवरहिता, तस्यां सत्यामाचारः प्रकाशते परिशुद्धभित्तिगतचित्रकर्म्मवत् । तथा चोक्तमपरग्रंथे—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आधाकम्मुद्देसिय अज्झोवज्झेय पूदि मिस्सेय ।
ठविदे बलि पाहुडिय पादुक्कारेय कीदेय ॥
पामिच्छे परियट्टे अभिहडमुभिन्न मालमारोहे ।
अच्छिज्जे अणिसिट्ठे उग्गमदोसो दु सोलसमो ॥

आधाकम्मं गृहस्थाश्रितं पंचशूनोपेतं निकृष्टव्यापारं षट्जीवनिकायवधकरं षट्चत्वारिंशद्दोषेबाह्यं **उद्देसिय** उद्देश्य देयं । **अज्झोवज्झेय** यतिं दृष्ट्वाऽधिकपाकप्रवृत्तिः । **पूदि** अप्रासुकमिश्रिताहारः । **मिस्सेय** असंयतैः सह भोजनं । **ठविदे** पाकभाजनादन्यत्र निक्षिप्तं । **बलि** यक्षादिदत्तनैवेद्यशेषं । **पाहुडिय** कालं परावृत्त्य दत्तं । **पादुकारेय** संक्रमणप्रकाशनरूपं । **कीदेय** क्रीत्वा नीतं । **पामिच्छे** उद्धारानीतं । **परियट्टे** परावृत्त्याऽऽनीतं । **अभिहडं** देशान्तरागतवस्तु । **उभिन्न** उद्भिन्नं बंधनापनयनं । **मालारोहण** मालामारुह्य दत्तं । **अच्छिज्जे** भीत्वा दत्तं । **अणिसिट्ठे** निःश्रेण्यादिकमवरुह्य दत्तं । एते षोडशोद्गमदोषाः भवन्ति ।

धादीदूदनिमित्ते आजीवे वणिवगे तहेव तिगिंच्छे ।
कोधी माणी मायी लोभी य हवन्ति दस एदे ॥
पुव्वी पच्छा संथुदि विज्जा मंतेय चुण्णजोगेय ।
उप्पादणाय दोसा सोलसमे मूलकम्मेय ॥

धादी धात्रिका । **दूदा** लेखादिनेता । **निमित्तं** निमित्तशास्त्रं । **आजीवो** जीविका । **वणिवगे** दातुरनुकूलवचनं । **तिगिंछे** वैद्यकशास्त्रं । क्रोधी । मानी । मायावी । लोभी । **पुव्वी** दानग्रहणात्पूर्वस्तुतिः । **पच्छा** दानं गृहीत्वा पश्चात्स्तवनं । **विज्जा** आकाशगमनादि । **मंतेय** मंत्रसर्पादिविषापहारः । **चुण्णजोगेय** तनुसंस्कारहे-

तुसुगंधिद्रव्यरजः । **मूलकम्मेय** वशीकरणं । एते षोडशोत्पादन-दोषा भवन्ति ।

संकिदा सन्दिह्यमानं । **मक्खिदा** तैलाद्यभ्यक्तं । **णिक्खिदा** अप्रासुकोपस्थापितं । **पिहिय** सचित्तादिपरिस्थापितं । **साहरणा** झटिति ग्रहणं । **दायग** सदोषदाता । **उमिस्से** अप्रासुकमिश्रं । **अपरिणद** अविध्वस्तं । **लित्ता** खटिकादिलिप्तं । **छोडिद** त्यक्त्वाऽऽदिभोजनं । एते दशैषणा दोषाः ।

संयोयणा स्वादनिमित्तं शीतोष्णभक्तपानादिमिश्रणं । **अप्पमाणं** मात्राधिक्यं । **इंगाल** सगृद्धिभोजनं । **धूम** निंदयन् भुंक्ते । एते-ऽप्येषणादोषा भवन्ति ।

एतैर्षट्चत्वारिंशद्दोषैः परिवर्जितैषणासमितिर्भवति ।

कायशुद्धिर्निरावरणा निरस्तसंस्कारा यथाजातमलधारिणी निराकृतांगविकारा सर्वत्र प्रयत्नवृत्तिः प्रशममूर्तिमिव प्रदर्शयन्ती तस्यां सत्यां न स्वतोऽन्यस्य भयमुपजायते नाप्यन्यतः स्वस्य । विनयशुद्धिरर्हदादिपरमगुरुषु यथाऽर्हपूजाप्रवणा ज्ञानादिषु च यथा-विधिभक्तियुक्ता गुरोः सर्वत्रानुकूलवृत्तिः प्रश्नस्वाध्यायवाचनाकथा-विज्ञापनादिषु प्रतिपत्तिकुशला देशकालभावावबोधनिपुणाऽऽचार्यानु-मतचारिणी तन्मूलाः सर्वसंपदः सैव भूषा पुरुषस्य सैव नौः संसार-समुद्रोत्तरणे । ईर्यापथशुद्धिर्नानाविधजीवस्थानां योनीनामाश्रयाणा-

१ "क" पुस्तके एष उद्गमदोषादिप्रस्ताव एषणासमितिप्रकरणे लिखितो-ऽस्ति तत्रैव मनोज्ञतया प्रतिभाति प्रस्तुतत्त्वविशेषात् । अत्र विस्मृत्य लिखित इति पाठकाः क्षमां विदधतु-प्रार्थी, इन्द्रलाल शास्त्री ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेव बोधाज्जनितप्रयत्नपरिहृतजन्तुपीडाज्ज्ञानादित्यस्वेन्द्रियप्रकाशानिरीक्षितदेशगामिनी द्रुतविलम्बितसंभ्रान्तविस्मितलीलाविकारदिगवलोकनादिदोषविरहितगमना तस्यां सत्यां संयमः प्रतिष्ठितो भवति विभव इव सुनीतौ । भिक्षाशुद्धिः परीक्षितोभयप्रचारा प्रमृष्ट पूर्वापरस्वाङ्गदेशविधानाऽऽचारसूत्रोक्तकालदेशप्रकृतिप्रतिपत्तिकुशला लाभालाभमानावमानसमानमनोवृत्तिः गीतनृत्तप्रसूतिकामृतकसुरापण्याङ्गनापापकर्मदीनानाथदानशालायजनविवाहादिमङ्गलगेहपरिवर्जनपरा चन्द्रगतिरिव हीनाधिकगृहविशिष्टोपस्थाना लोकगर्हितकुलपरिवर्जनोपलक्षिता दीनवृत्तिविगमा प्रासुकाऽऽहारगवेषणाप्रणिधानाऽऽगमविहितनिरवद्याशनपरिप्राप्तप्राणयात्राफला तत्प्रतिबद्धा हि चरणसंपद्गुणा संपदिव साधुजनसेवानिबंधना सा लाभालाभयोः सरसविरसयोश्च समसन्तोषवद्भिर्भिक्षेति भाष्यते। भिक्षाशुद्धिपरस्य मुनेरशनं पंचविधं भवति, गोचाराक्षम्रक्षणोदराग्निप्रशमनभ्रमराहारश्वभ्रपूरणनामभेदेन । यथा सलीलसालंकारयुवतिभिरुपनीयमानघासे गौर्न तदंगगतसौन्दर्यनिरीक्षणपरस्तृणमेवाऽत्ति यथा वा तृणोलपं नानादेशस्थं यथालाभमभ्यवहरति न योजनासंपदमपेक्षते तथा भिक्षुरपि भिक्षापरिवेषकजनमृदुललिततनुरूपवेषाभिलाषविलोकननिरुत्सुकशुष्कद्रवाहारयोजनाविशेषं चानवेक्ष्यमाणो यथाऽऽगतमश्नातीति गोरिव चारो 'गोचार' इति व्यपदिश्यते तथा गवेषणेति च । यथा शकटीं रत्नभारपूर्णां येन केनचित्स्नेहेनाक्षिलेपं कृत्वाऽभिलषितदेशान्तरं वणिगुपनयति तथा मुनिरपि गुणरत्नभरितां तनुशकटीमनवद्यभिक्षाऽऽयुरक्षम्रक्षणेनाभिप्रेतसमाधिपत्तनं प्रापयतीति 'अक्षम्रक्षण' मिति च नाम रूढं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा भांडागारे समुत्थितमनलं शुचिनाऽशुचिना वा वारिणा प्रशमयति गृही तथा यथालब्धेन यतिरप्युदराग्निं सरसेन विरसेन वाऽऽहारेण प्रशमयतीत्युदराग्निप्रशमनमिति च निरुच्यते। दातृजनबाधया विना कुशलो मुनिर्भ्रमरवदाहरतीति भ्रमराहार इत्यपि परिभाष्यते। येन केनचित्कृतचारेण श्वभ्रपूरणवदुदरगर्त्तमनगारः पूरयति स्वादुनेतरेण वेति श्वभ्रपूरणमिति च निगद्यते। प्रतिष्ठापनशुद्धिपरः संयतो नखरोमसिंघाणकनिष्ठीवनशुक्रोच्चारप्रस्रवणशोधने देहपरित्यागे च विदितदेशकालो जंतूपरोधमंतरेण यत्नं कुर्यात्प्रयतते। संयतेन शयनाशनशुद्धिपरेण स्त्रीक्षुद्रचौरपानाक्षशौंडशाकुनिकादिपापजनावासा वर्ज्याः शृङ्गारविकारभूषणोज्वलवेषवेश्याक्रीडाभिरामगीतनृत्तवादित्राकुलप्रदेशा विकृतांगगुह्यदर्शनकाष्ठमयालेख्यहास्योपभोगमहोत्सववाहनदमनायुधव्यायामभूमयश्च रागकारणानीन्द्रियगोचरा मदमानशोककोपसंक्लेशस्थानादयश्च परिहर्त्तव्याः, अकृत्रिमा गिरिगुहातरुकोटरादयः कृत्रिमाश्च शून्यागारादयो मुक्तमोचितावासा अनात्मोद्देशनिवार्त्तिता निरारंभाः सेव्याः। तत्र संयतस्य त्रिविधो निवासः, स्थानमासनं शयनं चेति। पादौ चतुरांगुलान्तरे प्रस्थाप्याऽधस्तिर्यगूर्द्ध्वाऽन्यतममुखो भूत्वा यत्राऽऽत्मभावो यथाऽऽत्मबलवीर्यसदृशः कर्मक्षमप्रयोजनोऽसंक्लिष्टमातिस्तिष्ठेत्, अथ न शक्नुयान्निष्प्रतिज्ञातः पर्यङ्कादिभिरासनैरासीत, यद्यपरिमितकालयोगः खिन्नो वैकपार्श्वबाहूपधानसंवृतांगादिभिरल्पकालं श्रमपरिहारार्थं शयीत। वाक्यशुद्धिः पृथिवीकायिकाद्यारंभप्रेरणरहिता युद्धकामकर्कशसंभिन्नालापपैशून्यपरुषनिष्ठुरादिपरपीडाकरप्रयोगनि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुत्सुका स्त्रीभक्तराष्ट्रावनिपालाऽऽश्रितकथाविमुखा व्रतशीलदेशनादिप्रदानफला स्वपरहितमितमधुरमनोहरा परमवैराग्यहेतुभूता परिहृतपरात्मनिन्दाप्रशंसा संयतस्य योग्या तदधिष्ठाना हि सर्वसंपद इति ।

इति शुद्धिप्रकरणम् ।

अथ संयमभेदाः साक्षान्मोक्षप्राप्तिकारणान्युच्यन्ते । सामायिकं, छेदोपस्थापना, परिहारविशुद्धिः, सूक्ष्मसाम्परायः, यथाख्यातचारित्रमिति ।

तत्र सामायिकमवस्थानं सर्वसावद्ययोगस्याभेदेन प्रत्याख्यानमवलंब्य प्रवृत्तमथवाऽवधृतकालमनवधृतकालं सामायिकमित्याख्यायते । त्रसस्थावरजन्तुदेशकालप्रादुर्भावनिरोधाप्रत्यक्षत्वात् प्रमादवशादभ्युपगतनिरवद्यक्रियाप्रबंधप्रलोपे सति तदुपात्तस्य कर्मणः सम्यक् प्रतिक्रिया छेदोपस्थापनाऽथवा सावद्यकर्मणो हिंसादिभेदेन विकल्पान्निवृत्तिश्छेदोपस्थापना । प्राणिवधान्निवृत्तिः परिहारस्तेन विशुद्धिर्यस्मिन्तत्परिहारविशुद्धिचारित्रम् तत्पुनस्त्रिंशद्वर्षजातस्य संवत्सरपृथक्त्वं तीर्थकरपादमूलसेविनः प्रत्याख्याननामधेयपूर्वार्णवपारंगतस्य जन्तुनिरोधप्रादुर्भावकालपरिणामजन्मयोनिदेशद्रव्यस्वभावविधानज्ञस्य प्रमादरहितस्य महावीर्यस्य परमनिर्जरस्यातिदुष्करचर्यानुष्ठायिनस्तिस्रः सन्ध्यां वर्जयित्वा द्विगव्यूतिगामिनः संपद्यते नान्यस्य । सूक्ष्मस्थूलसत्त्ववधपरिहारप्रवृत्तत्वादनुपहतोत्साहस्याखंडितक्रियाविशेषस्य सम्यग्दर्शनज्ञानमहामारुतसंधुक्षितप्रशस्ताध्यवसायाग्निशिखोपश्लिष्टकर्मेन्धनस्य ध्यानविशेषविशिखीकृतकषायविषांकुरस्यापचयाभिमुखस्तो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कमोहवीजस्य तत एव परिप्राप्तान्वर्थसूक्ष्मसाम्परायशुद्धसंयतस्य सूक्ष्मसाम्परायचारित्रम् । चारित्रमोहस्य निरवशेषस्योपशमात्क्षयाच्चात्मस्वभावावस्थोपेक्षालक्षणमथाख्यातचारित्रं, अथ शब्दस्यानन्तयथार्थवृत्तित्वान्निरवशेषमोहक्षयोपशमाऽनंतरमाविर्भवतीत्यथाख्यातं, अथवा यथाऽऽत्मस्वभावावस्तिथस्तथैवाऽऽख्यातत्वाद्यथाख्यातमिति ।

ततो यथाख्यातचारित्रात्सकलकर्मसमाप्तिर्भवति । सामायिकादीनामानुपूर्व्या वचनमुत्तरोत्तरगुणप्रकर्षख्यापनार्थन् । तद्यथा—सामायिकछेदोपस्थापनासंयमस्य जघन्यविशुद्धिरल्पा ततः परिहारविशुद्धिचारित्रस्य जघन्यलब्धिरनन्तगुणा तस्यैवोत्कृष्टाविशुद्धिरनन्तगुणा ततः सामायिकछेदोपस्थापनासंयमोत्कृष्टविशुद्धिरनन्तगुणा ततः सूक्ष्मसाम्परायचारित्रस्य जघन्यविशुद्धिरनन्तगुणा तस्यैवोत्कृष्टा विशुद्धिरनन्तगुणा ततो यथाख्यातचारित्रविशुद्धिः संपूर्णा प्रकर्षाप्रकर्षविरहिताऽनन्तगुणाः । एवमेते पञ्च चारित्रोपयोगाः शब्दविषयत्वेन संख्येयभेदाः । बुध्यध्यवसानभेदादसंख्येया अर्थादनन्तभेदाश्च भवंति । तदेतच्चारित्रं सर्वास्रवनिरोधकारणत्वात्परमसंवरहेतुरित्यवसेयम् ।

अथ वा व्रतधारणसमितिपालनकषायनिग्रहदंडत्यागेन्द्रियजयः संयमः । तत्र हिंसाऽनृतस्तेयाऽब्रह्मपरिग्रहविरतिरिति पंचधा व्रतं । तत्रेन्द्रियकषायनिग्रहमकृत्वा प्रमत्त इव यः प्रवर्त्तते स प्रमत्तः । पंचेन्द्रियमनोवाक्कायबलोच्छ्वासनिःश्वासायुष्काणि प्राणाः । एकेन्द्रियादयः प्राणिनः प्रमत्तपरिणामयोगात्प्राणिप्राणव्यपरोपणं हिंसा । सा च संरंभसमारंभारंभैस्त्रिभिः कायवाङ्मनःकर्मयोगैस्त्रिभिः कृत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारितानुमतैस्त्रिभिः क्रोधादिकषायैश्चतुर्भिर्भिद्यते । तत्र प्राणव्यपरोपणादिषु प्रमादतः प्रयत्नावेशः संरंभः। साध्यायाः क्रियायाः साधनानां समाहारः समारंभः। आदौ क्रमः प्रक्रम आरंभ इति। औदारिकशरीरनामकर्मोदयवशात्पुद्गलैश्चीयत इति कायः। वाक् द्विविधा, भाववाक्, द्रव्यवागिति। तत्र भाववाग्वीर्यान्तरायमतिश्रुतज्ञानावरणक्षयोपशमांगोपांगनामलाभनिमित्तत्वात् पौद्गलिकी। तदभावे तद्वृत्यभावात्तत्सामर्थ्योपेतेन क्रियावताऽऽत्मना प्रेर्यमाणाः पुद्गला वाक्त्वेन विपरिणमन्त इति द्रव्यवागपि पौद्गलिकी। मनश्च द्विविधं, भावमनो द्रव्यमनश्चेति। तत्र भावमनो लब्ध्युपयोगाभ्यां लक्ष्यते पुद्गलावलंबनत्वात्पौद्गलिकं। द्रव्यमनश्च ज्ञानावरणवीर्यान्तरायक्षयोपशमलाभप्रत्यया गुणदोषविचारस्मरणादिप्रणिधानाभिमुखस्यात्मनोऽनुग्राहकाः पुद्गला वीर्यविशेषावर्जनसमर्था मनस्त्वेन परिणता इति पौद्गलिकमिति। स्वातन्त्र्यविशिष्टेनात्मना यः प्रादुर्भावितं तत्कृतं। परस्य प्रयोगमपेक्ष्य सिद्धिमापद्यमानं कारितं। प्रयोजकस्य मनसाऽभ्युपगमनमनुमतमिति। आत्मनः सम्यक्त्वसंयमासंयमसंयमयथाख्यातचारित्रं कषन्तीति कषायाः। अथ वा कृषन्ति फलवत्कुर्वन्ति कर्मबीजमिति कषायाः। संरंभसमारंभारंभणामधस्तात् योगान् कृतकारितानुमतानि क्रोधमानमायालोभांश्च क्रमेण व्यवस्थाप्य संरंभं निरुध्याङ्कसंचारे कृते षट्त्रिंशद्विकल्पा भवन्ति। एवं समारंभे आरंभे च प्रत्येकं षट्त्रिन्शद्विकल्पा भवन्ति। सर्वे संपिंडिता अष्टोत्तरशतसंख्याका भवन्ति।

एवं कायादियोगान्कृतकारितानुमतानि क्रोधादिकषायांश्चैकैकं निरुध्यांकसंचारः कर्त्तव्यः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संख्यातासंख्यातानंतभवसंसारावस्थानमनन्तानुबन्धिनां कषाया- णां । षण्मासावस्थानमप्रत्याख्यानानां । पक्षावस्थानं प्रत्याख्या- नानां । अन्तर्मुहूर्तावस्थानं संज्वलनानां । एवंविधषोडशकषायभेदात् द्वात्रिंशदुत्तरचतुःशतविकल्पा भवन्ति ।

अप्रतिपीड्याः सूक्ष्मजीवाः, वादरजीवानां गत्यादिमार्गणागुण- स्थानकुलयोन्यायुष्यादिकं ज्ञात्वा गमनस्थानशयनासनादिषु स्वयं न हननं, परैर्वा न घातनं, अन्येषामपि हिंसतां नानुमोदनं हिंसा- विरतिः । अहिंसाव्रतं स्वर्गापवर्गफलप्रापणहेतुस्तत्प्रतिपालननिमित्तं शेषाणि व्रतानि । अहिंसकः पुरुषो निजजनकवद्विश्वास्यः पूज्यश्च भवति । हिंस्रो हि नीत्योद्वेजनीयः संततोऽनुबद्धवैरश्चेहैव च वध- बन्धपरिक्लेशादीन् परिलभते प्रेत्य चाशुभां गतिं, गर्हितश्च भवतीति हिंसाया व्युपरमः श्रेयान् । परमार्थग्रहणेच्छयाऽहिंसाव्रतस्थैर्यार्थं पंच भावना भवन्ति ।

वाग्गुप्तिः, मनोगुप्तिः, ईर्यासमितिः, आदाननिक्षेपणासमितिः, आलोकितपानभोजनमिति ।

[1]पारमार्थिकस्य भूतनिह्नवेऽभूतोद्भावने च यदभिधानं तदेवानृतं स्यात् । भूतनिह्नवे नास्त्यात्मा नास्ति परलोक इत्यादि । अभूतो- द्भावने च [2]श्यामाकतंदुलमात्रे [3] आत्मांगुष्ठपर्वमात्रः सर्वगतो निष्क्रिय इत्यादि । यद्विद्यमानार्थ विषयं प्राणिपीडाकारणं तत्सत्यमप्यसत्य-

---

१ " ख " पुस्तके " परमार्थिकस्य " इति पाठो नास्ति । २ तंदुलसंज्ञो विशेषः । ३ प्रमाणे " द्वयसज्दघ्नञ्मात्रचः " इत्यनेन पाणिनिसूत्रेण प्रमाणार्थे मात्रच् प्रत्ययः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेतद्विपरीतं यच्च प्राणिपीडाकरं तदनृतं कृतात्कारितादनुमोदिताद्वाऽनृताद्विरतिः सत्यव्रतं तदभ्युदयनिःश्रेयसकारणं । सत्यवादिनं तदभ्युदयनिःश्रेयसकारणं । सत्यवादिनं सन्मानयति लोकः, सर्वेषु कार्येषु प्रमाणं भवति, अनृतवाद्यश्रद्धेयो[1] भवति, इहैव जिह्वाच्छेदनादीन् प्रतिलभते, मिथ्याभ्याख्यानदुःखितेभ्यश्च बद्धवैरेभ्यो बहूनि व्यसनान्यवाप्नोति प्रेत्य[2] चाऽशुभां गतिं । निंदितश्च भवतीत्यनृतवचनाद्युपरमः श्रेयान् । सत्यव्रतदृढीकरणार्थं पंच भावना भवंति ।

क्रोधप्रत्याख्यानं, लोभप्रत्याख्यानं, भीरुत्वप्रत्याख्यानं, हास्यप्रत्याख्यानं, अनुवीचीभाषणं चेति । अनुवीचीभाषणमनुलोमभाषणमित्यर्थः, विचार्य भाषणमनुवीचीभाषणम् ।

अदत्ताऽऽदानं स्तेयं । ग्रामारामशून्यागारवीथ्यादिषु निपतितमणिकनकवस्त्रादिवस्तुनो ग्रहणमदत्तादानं । कृतकारितादिभिस्तस्माद्विरतिरस्तेयव्रतम् । तद्गीर्वाणनिर्वाणप्रदं । अस्तेयव्रतिनो बहिश्चरप्राणेष्वर्थेष्वपि विश्वसिति लोकः । परद्रव्यहरणासक्तमतिः सर्वस्योद्वेजनीयो भवति, इहैव चाभिघातवधबन्धहस्तपादकर्णनासोत्तरौष्ठच्छेदनभेदनशूलारोहणक्रकच[3]पाटनकारागारविनिवेशनसर्वस्वहरणादीन्प्रतिलभते प्रेत्य चाशुभां गतिं । कुत्सितश्च भवति, तत्संसर्गतः शिष्टोऽपि संशयमवाप्नोति । अदत्तादानव्रतस्थिरीकरणार्थं भावनाः पञ्च भवंति ।

---

१ " श्रदन्त इत्येतयोरुपसर्गवद्वृत्तिर्वक्तव्या " अत्र डुधाञ् धातुः, अप्रत्येय इत्यर्थः । २ पंचत्वं प्राप्य । ३ अस्त्रविशेषः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शून्यागारगिरिगुहातरुप्रकोटरादिष्वावासः, परकीयेषु मोचितेष्वावासः, परेषां मनुष्यव्यन्तरादीनामुपरोधाकरणं, आचारसूत्रमार्गेण भैक्ष्यशुद्धिः, ममेदं तवेदमिति लक्षणो विसंवादः, न विसंवादोऽविसंवादः, सधर्मिभिरविसंवाद इति ।

मैथुनमब्रह्म, स्त्रीपुंसोर्वेदोदये वेदनापीडितयोर्यत्कर्म तन्मैथुनमथवैकस्याऽपि चारित्रमोहोदयोद्रक्तरागस्य हस्तादिसंघट्टनेऽस्ति मैथुनमिति । अहिंसादिगुणबृंहणाद्ब्रह्म न ब्रह्म अब्रह्म तिर्यङ्मनुष्यदेवाऽचेतनभेदाच्चतुर्विधस्त्रीभ्यो मातृसुताभगिनीभावनया मनोवाक्कायप्रत्येककृतकारितानुमोदितभेदेन नवविधाद्विरतिश्चतुर्थव्रतं । तदेव स्वर्गमोक्षसाधनं, ब्रह्मचारिणं भूमिस्थमपि साक्षाद्देव इव मन्यते लोकः । असंयतोऽपि तद्व्रतो मानार्हो भवति, तस्मिन्प्रतिष्ठिताः सर्वे गुणाः, विद्यादेवताश्च परिगृहीतब्रह्मव्रतस्य किंकरभावमुपयांति । अब्रह्मचारी मदविभ्रमोन्मथितचित्तो वनगज इव वासितावंचितो[1] विवशो वधबंधपरिक्लेशादीननुभवति, मोहाभिभूतत्वाच्च कार्याकार्यानभिज्ञो न किंचित्कुशलमाचरति, परांगनालिंगनसंगकृतरतिश्चेहैव वैरानुबंधिनो लिंगच्छेदनवधबन्धनसर्वस्वहरणादीनपायान्[2] प्राप्नोति, प्रेत्य चाशुभां गतिमश्नुते[3], तृणवल्लघुश्च भवतीत्यतः स्त्रीविरतिरात्महिता । ब्रह्मचर्यव्रतनिश्चलीकरणार्थं पंच भावना भवंति ।

स्त्रीरागकथाश्रवणवर्जनं, तन्मनोहरांगनिरीक्षणविरहः, पूर्वरतानुस्मरणव्यपोहः, वृष्येष्टरसानुभवनिरासः, स्वशरीरसंस्कारत्यागश्चेति ।

---

१ वनकरिणी । २ दुःखानि । ३ लभते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूर्च्छा परिग्रहः, बाह्याभ्यन्तरोपधिसंरक्षणादिव्यावृत्तिर्मूर्च्छा । क्षेत्रवास्तुधनधान्यद्विपदचतुष्पदयानशयनासनकुप्पभांडानि दशविधश्चेतनाचेतनभेदलक्षणो बाह्यपरिग्रहः । मिथ्यात्वक्रोधमानमायालोभहास्यरत्यरतिशोकभयजुगुप्सावेदरागद्वेषचतुर्दशभेदोऽभ्यन्तरपरिग्रहः । एतस्मान्मनसः कृतकारितानुमोदितेन वचसः कृतकारितानुमोदितेन कायस्य कृतकारितानुमोदितेन च विरतिरपरिग्रहलक्षणं व्रतम् । तदेव स्वर्गमोक्षैकसाधनं सर्वेषां गुणानामलंकरणं, निष्परिग्रहव्रतिनं सर्वेऽपि सन्मानयन्ति, स सर्वैश्च समभिवन्दनीयः संपूजनीयश्च भवति, तस्य नामग्रहणेऽपि बद्धांजलिर्भवति लोकः । परिग्रहवान् यथा शकुनि[1]गृहीतमांसखंडोऽन्येषां तदर्थिनां पतत्रिणामभिभवनीयः[2], तथा तस्करादीनामभिभवनीयो मार्यश्च भवति, परिग्रहार्जननिमित्तं निजाभिजन[3]विद्यावृत्तं विहाय केचन जडधियो[4] नीचतामुपगच्छन्ति, न चाऽस्य तृप्तिर्भवतीन्धनैरिवाऽग्नेर्लोभाभिभूतत्वाच्च कार्याकार्यानपेक्षो भवति, प्रेत्य चाशुभां गतिमास्कन्दति, लुब्धोऽयमिति गर्हितश्च भवतीति नीचवृत्त्या समुपार्जनीयमनित्यं दुःखकारणं परिग्रहं परित्यज्याकिंचन्यवृत्त्या नित्यमनन्तसुखसाधनं मोक्षमार्गमुपार्जयन्त्यत्महितैषिणः । आकिंचन्यव्रतद्रढिमा[5]र्थं पंच भावना भवंति ।

पंचानां स्पर्शनरसनघ्राणचक्षुःश्रोत्राणामिष्टेषु विषयेषूपनिपतितेषु रागवर्जनमनिष्टेषु विषयेषूपनिपतितेषु द्वेषवर्जनामिति ।

---

१ पक्षी । २ तिरस्करणीयः । ३ कुल । ४ मूर्खाः । ५ " द्रढिमा " इत्यत्र " इमनिच् " प्रत्ययः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमहिंसादिव्रतानां लक्षणं फलं गुणं तदभावे दोषभावनां च ज्ञात्वा यथा ममाप्रियं वधबन्धपरिपीडनं तथा सर्वसत्वानां। यथा मम मिथ्यात्वाख्यानकटुकपरुषादीनि वचांसि शृण्वतोऽतितीव्रं दुःखमभूतपूर्वमुत्पद्यते तथा सर्वजीवानां। यथा ममेष्टद्रव्यवियोगे व्यसनपूर्वमुपजायते तथा सर्वभूतानां। यथा मम कान्ताजनपरिभवे परकृते सति मानसी पीडाऽतितीव्रा जायते तथा सर्वप्राणिनां। यथा च मम परिग्रहेष्वप्राप्तेषु कांक्षोद्भवं प्राप्तेषु रक्षाजनितं विनष्टेषु शोकसमुत्थं दुःखमतितीव्रतरं भवति तथा च सर्वदेहिनाम्। अतो न हिनस्मि[1]। नानृतं वदामि। नादत्तमाददे। नांगनां स्पृशामि। न परिग्रहमुपाददे इत्येवं प्रमत्तपरिणामयोगजनितं हिंसादिकं विहायाप्रमत्तपरिणामादहिंसादिव्रतधारणे यत्नः कर्त्तव्यः।

समितिपालनं पूर्वमुक्तं। चतुर्विधकषायनिग्रहश्चोत्तमक्षमामार्दवार्जवसत्यशौचेषु प्रतिपादितः।

दंडस्त्रिविधः, मनोवाक्कायभेदेन। तत्र रागद्वेषमोहविकल्पात्मा मानसो दंडस्त्रिविधः, तत्र रागः प्रेमहास्यरतिमायालोभाः। द्वेषः क्रोधमानारतिशोकभयजुगुप्साः। मोहो मिथ्यात्वत्रिवेदसहिताः प्रेमहास्यादयः। अनृतोपघातपैशून्यपरुषाभिशंसनपरितापहिंसनभेदाद्वाग्दंडः सप्तविधः। प्राणिवधचौर्यमैथुनपरिग्रहाऽऽरंभताडनोग्रवेषविकल्पात्कायदंडोऽपि च सप्तविधः। गुप्तात्मना प्रयतमानेन दंडत्यागो विधेयः।

विषयाटवीषु स्वच्छन्दप्रधावमानेन्द्रियगजानां ज्ञानवैराग्योपवा-

---

१ रौधादिकोऽयं धातुः

साद्यंकुशाकर्षणेन वशीकरणमिन्द्रियजयः । स चास्त्रवानुप्रेक्षायां वक्ष्यते ।

संयमो ह्यात्महितस्तमनुतिष्ठन्निहैव पूज्यते। परत्र किमत्र वाच्यं । असंयतः प्राणिवधविषयमार्गेषु नित्यं प्रवृत्तो मूर्तिमदशुभकर्मैवाय-मिति साधुजनविनिंद्यमानो दुष्कर्म्म संचिनुते।

संयमिनो नैर्ग्रन्थ्यधारिणः पंचविधाः । पुलाकाः, वकुशाः, कुशीलाः, निर्ग्रन्थाः, स्नातकाश्चेति । तत्रोत्तरगुणभावनोपेतमनसः व्रतेष्वपि क्वचित्कदाचित्परिपूर्णतामपरिप्राप्नुवन्तोऽविशुद्धपुलाकसादृ-श्यात्पुलाका इत्युच्यन्ते । नैर्ग्रन्थ्यमुपस्थिता अखंडितव्रताः शरीरो-पकरणविभूषणानुवर्त्तिनो वृद्धियशःकामाः शातगौरवाश्रिता अविविक्त-परदाराश्च (?) छेदशवलयुक्ता वकुशाः । शवलपर्यायवाची बकुश-शब्द इति । कुशीला द्विविधाः, प्रतिसेवनाकुशीलाः, कषायकुशीला-श्चेति। तत्राविविक्तपरिग्रहाः(?) परिपूर्णमूलोत्तरगुणाः कथंचिदुत्तरगुण-विरोधिनः प्रतिसेवनाकुशीलाः, ग्रीष्मे जंघाप्रक्षालनादिसेवनवदिति । वशीकृतान्यकषायोदयाः संज्वलनमात्रतंत्राः कषायकुशीला इति । यथोदके दंडराजिराश्वेव विलयमुपयाति तथाऽनभिव्यक्तोदयकर्माण ऊर्द्ध्वं मुहूर्त्तादुद्भिद्यमानकेवलज्ञानदर्शनभाजो निर्ग्रन्था इति । ज्ञाना-वरणादिघातिकर्मक्षयादाविर्भूतकेवलज्ञानाद्यतिशयविभूतयः सयोगि-शीलेशिनो नवलब्ध्यास्पदाः केवलिनः स्नातका इति । एते प्रकृष्टा-प्रकृष्टमध्यमचारित्रभेदे सत्यपि नैगमनयापेक्षया पंचापि निर्ग्रन्था इत्युच्यन्ते । यथा षोडशत्रयोदशदशवर्णिकादिषु सुवर्णशब्दोऽवि-शिष्टो वर्त्तते तथा निर्ग्रन्थशब्दोऽपि । सम्यग्दर्शनं निर्ग्रन्थरूपं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूषावेषायुधरहितं तत्सामान्ययोगात्सर्वेषु पुलाकादिषु निर्ग्रन्थ-शब्दो युक्तः ।

पुलाकादिनिर्ग्रन्था उत्तरोत्तरगुणप्रकर्षवृत्तिविशेषाः संयमादिभिरष्टाभिरनुयोगैर्व्याख्येयाः । तद्यथा—संयमः, श्रुतं, प्रतिसेवना, तीर्थं, लिंगं, लेश्या, उपपादः, स्थानमिति विकल्पतः पुलाकादयः साध्याः । तत्र संयमे पुलाकवकुशप्रतिसेवनाकुशीलाः द्वयोः संयमयोः सामायिकच्छेदोपस्थापनयोर्भवन्ति । कषायकुशीलाः सामायिकच्छेदोपस्थापनयोः परिहारविशुद्धिसूक्ष्मसांपराययोश्च भवन्ति । निर्ग्रन्थाः स्नातकाश्चैकस्मिन्नेव यथाख्यातसंयमे भवन्तीति । श्रुते पुलाकवकुशप्रतिसेवनाकुशीला उत्कर्षेणाभिन्नाक्षरदशपूर्वधराः कषायकुशीला निर्ग्रन्थाश्चतुर्दशपूर्वधराः । जघन्येन पुलाकस्य श्रुतमाचारवस्तु, वकुशकुशीलनिर्ग्रन्थानां श्रुतमष्टौ प्रवचनमातरः । स्नातका अपगतश्रुताः केवलिनः । प्रतिसेवनायां पंचानां मूलगुणानां रात्रिभोजनवर्जनस्य च पराभियोगाद्बलादन्यतमं प्रतिसेवमानः पुलाको भवति । वकुशो द्विविधः, उपकरणवकुशः, शरीरवकुशश्चेति । तत्रोपकरणाभिष्वक्तचित्तो विविधविचित्रपरिग्रहयुक्तो बहुविशेषोपयुक्तोऽपकरणाकांक्षी तत्संस्कारप्रतीकारसेवी भिक्षुरुपकरणवकुशो भवति । शरीर-संस्कारसेवी शरीरवकुशः । प्रतिसेवनाकुशीलो मूलगुणानविराधयन्नुत्तरगुणेषु कांचिद्विराधनां प्रतिसेवते । कषायकुशीलनिर्ग्रन्थस्नातकानां प्रतिसेवना नास्ति । तीर्थे सर्वेषां तीर्थकराणां तीर्थेषु भवन्ति । लिंगे, द्रव्यभावभेदाल्लिंगं द्विविधं, भावलिंगं प्रतीत्य सर्वे पंचाऽपि निर्ग्रन्था

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लिंगिनो भवन्ति, द्रव्यलिंग प्रतीत्य भाज्याः । लेश्यायां पुलाकस्योत्तरास्तिस्रो लेश्या भवन्ति । वकुशप्रतिसेवनाकुशीलयोः षडपि, कषायकुशीलस्य परिहारविशुद्धस्य चतस्र उत्तराः, सूक्ष्मसाम्परायस्य निर्ग्रन्थस्नातकयोश्च शुक्लैव केवला भवति, अयोगिनः शैलेशितां प्रतिपन्ना अलेश्याः । उपपादे, पुलाकस्योत्कृष्ट उपपादोऽष्टादशसागरोपमोत्कृष्टस्थितिषु देवेषु सहस्रारे, वकुशप्रतिसेवनाकुशीलयोर्द्वाविंशतिसागरोपमस्थितिष्वारणाच्युतकल्पयोः, कषायकुशीलनिर्ग्रन्थयोस्त्रयस्त्रिंशत्सागरोपमस्थितिषु सर्वार्थसिद्धौ च सर्वेषामपि जघन्यः सौधर्मकल्पे द्विसागरोपमास्थितिषु स्नातकस्य निर्वाणमिति । स्थानेऽसंख्येयानि संयमस्थानानि कषायनिमित्तानि भवन्ति । तत्र सर्वजघन्यानि लब्धिस्थानानि पुलाककषायकुशीलयोस्तौ युगपदसंख्येयानि स्थानानि गच्छतः, ततः पुलाको व्युच्छिद्यते । कषायकुशीलस्ततोऽसंख्येयानि गच्छत्येकाकी । ततः कषायकुशीलप्रतिसेवनाकुशीलवकुशा युगपदसंख्येयानि स्थानानि गच्छन्ति, ततो वकुशो व्युच्छिद्यते, ततोऽप्यसंख्येयानि स्थानानि गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते, ततोऽप्यसंख्येयानि स्थानानि गत्वा कषायकुशीलो व्युच्छिद्यते, अत उर्द्धमकषायस्थानानि निर्ग्रन्थः प्रतिपद्यते, सोऽसंख्येयानि स्थानानि गत्वा व्युच्छिद्यते, अत उर्द्धमेकस्थानं गत्वा स्नातको निर्वाणं प्राप्नोतीत्येषां संयमलब्धिरनन्तगुणा भवतीति ।

अथ परीषहजयप्रकरणं प्रस्तौति ।

संयतेन तपस्विना दर्शनचारित्ररक्षणार्थं परिपोढव्याः परीषहाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तं हि—

परिषोढव्या नित्यं दर्शनचारित्ररक्षणे निरतैः ।
संयमतपोविशेषास्तदेकदेशाः परीषहाख्याः स्युः ॥

इत्युक्तत्वात्संयमतपसोर्मध्ये परीषहा उच्यन्ते । कर्मागमद्वाराणि संवृण्वंतो जैनेन्द्रान्मार्गान्मा च्योष्महीति पूर्वमेव परीषहान्विजयन्तो जितपरीषहाः संतस्तैरनभिभूयमानाः प्रधानसंवरमाश्रित्याप्रतिबंधेन क्षपकश्रेण्यारोहणसामर्थ्यं प्रतिपद्यन्ते । अभिन्नोत्साहाः सकलसांपरायिकप्रध्वंसनशक्तयो ज्ञानध्यानपरशुच्छिन्नमूलानि कर्माणि विधूय प्रस्फोटितपक्षरेणव इव पतत्रिण उर्द्ध्वं व्रजंतीत्येवमर्थं परिषोढव्याः परीषहाः ।

क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याऽऽक्रोशवधयाचनाऽलाभरोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाऽज्ञानादर्शनानीति क्षुधादयो द्वविंशतिपरीषहाः । त एते बाह्याभ्यन्तरद्रव्यपरिणामाः शारीरमानसप्रकृष्टपीडाहेतवस्तद्विजये विदुषा संयतेन तपस्विना मोक्षार्थिना प्रयत्नः कार्यः । तद्यथा—निवृत्तसंस्कारविशेषस्य शरीरमात्रोपकरणसन्तुष्टस्य तपःसंयमविलोपं परिहरतः कृतकारितानुमतसंकल्पितोद्दिष्टसंक्लिष्टक्रयागतप्रत्यादत्तपूर्वकर्मपश्चात्कर्म—दशविधदोषाविप्रमुक्तैषणस्य देशकालजनपदव्यवस्थापेक्षस्यानशनाध्वरोगतपःस्वाध्यायश्रमवेलातिक्रमावमोदर्यासद्वेद्योदयादिभ्यो नानाऽऽहारेन्धनोपरमे जठरांत्रदाहिनीमारुतांदोलिताऽग्निशिखेव समंताच्छरीरेन्द्रियहृदयसंक्षोभकरी क्षुदुत्पद्यते । तस्याः प्रतीकारं त्रिप्रकारमकाले संयमविरोधिभिर्वा द्रव्यैः स्वयमकुर्वतोऽन्येन क्रियमाणमसेव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानस्य मनसा वाऽनभिसंदधतो दुस्तरेयं वेदना महांश्च कालो दीर्घमह इति विषादमनापद्यमानस्य त्वगस्थिसिरावितानमात्रकलेवरस्यापि सतः आवश्यकक्रियादिषु नित्योद्यतस्य क्षुद्रशप्राप्तानर्थाञ्चारकबंधस्थमनुष्यपंजरगततिर्यक्प्राणिनः क्षुदभ्यर्दितान्परतंत्रानपेक्षमाणस्य ज्ञानिनो धृत्यंभसा शमकुंभधारितेन क्षुदग्निं शमयतस्तत्कृतपीडां प्रत्यविगणनं क्षुज्जय इत्युच्यते ।

जलस्नानावगाहनपरिषेकत्यागिनः पतत्रिवदध्रुवासनावसथस्यातिलवणस्निग्धरूक्षविरुद्धाहारग्रैष्मातपपित्तज्वरानशनादिभिरुदीर्णां शरीरेन्द्रियोन्माथिनीं पिपासां प्रत्यनाद्रियमाणप्रतीकारमनसो निदाघे पटुतपनकिरणसंतापिनोप्यटव्यामासन्नेष्वपि ह्रदेष्वप्कायिकजीवपरिहारेच्छया जलमनाददानस्य सलिलसेकविवेकम्लानां लतामिव ग्लानिमुपगतां गात्रयष्टिमवगणय्य तपःपरिपालनपरस्य भिक्षाकालेऽपींगिताकारादिभिर्योग्यमपि पानं पातुं परमचोदयतः परमधैर्यकुंभधारितशीतलसुगन्धिप्रतिज्ञातोयेन विध्यापयतस्तृष्णाग्निशिखां संयमपरत्वं पिपासासहनमित्यवसीयते ।

परित्यक्तवाससः पक्षिवदनवधारिताऽऽलयस्य शरीरमात्राधिकरणस्य शिशिरवसंतजलदागमादिकालवशाद्वृक्षमूले पथि गुहादिषु पतितप्रालेयतुषारलवव्यतिकरशिशिरपवनाभ्याहतमूर्त्तेस्तत्प्रतिक्रियासमर्थद्रव्यान्तराग्न्याद्यनभिसंधानान्नारकदुःसहशीतवेदनाऽनुस्मरणात् तत्प्रतिचिकीर्षायां परमार्थविलोपभयाद्विद्यामंत्रौषधपर्णवल्कलत्वक्तृणाजिनादिसंबंधात् व्यावृत्तमनसः परकीयमिव देहं मन्यमानस्य धृतिविशेषप्रावरणस्य गर्भागारेषु धूपप्रवेकपुष्पप्रकरप्ररूपितप्रदीपप्रभेषु

वरागनानवयौवनौष्णघनस्तननितंबभुजान्तरतर्जितशीतेषु निवासं सुरतसुखाकरमनुभूतमसारत्वावबोधादस्मरतो विषादविरहितस्य संयमपरिपालनं शीतक्षमेति भाष्यते ।

ग्रैष्म्येण पटीयसा भास्करकिरणसमूहेन सन्तापितशरीरस्य तृष्णानशनपित्तरोगघर्म्मश्रमप्रादुर्भूतौष्ण्यस्य खेदशोषदाहाऽभ्यर्दितस्य जलभवनजलावगाहनानुलेपपरिषेकार्द्रावनितलोत्पलदलकदलीपत्रोत्क्षेपमारुतजलतूलिकाचन्दनद्रवचन्द्रपादकमलकल्हारमुक्ताहारादिपूर्वानुभूतशीतलद्रव्यप्रार्थनाऽपेतचेतस उष्णवेदनातितीव्रा बहुकृत्वः परवशादवाप्ता इदं पुनस्तपो मम कर्मक्षयकारणमिति तद्विरोधिनीं क्रियां प्रत्यनादराच्चारित्ररक्षणमुष्णसहनमिति समाम्नायते ।

प्रत्याख्यातशरीराच्छादनस्य क्वचिदप्रतिबद्धचेतसः परकृतायतनगुहागह्वरादिषु रात्रौ दिवा वा दंशमशकमक्षिकापिशुकपुत्तिकामकुणकीटपिपीलिकावृश्चिकादिभिस्तीक्ष्णपातैर्भक्षमाणस्यातितीव्रवेदनोत्पादकैरव्यथितमनसः स्वकर्मविपाकमनुचिन्तयतो विद्यामन्त्रौषधादिभिस्तन्निवृत्तिं प्रति निरुत्सुकस्याऽऽशरीरपतनादपि निश्चितात्मनः परबलप्रमर्दनं प्रति वर्त्तमानस्य मदांधगन्धसिंधुरस्य रिपुजनप्रेरितविविधशस्त्रप्रतिघातादपराङ्मुखस्य निष्प्रत्यूहविजयोपलंभनमिव कर्म्मारातिपृतनापराभवं प्रति प्रयतनं दंशमशकादिबाधासहनमप्रतीकारमित्याख्यायते । दंशमशकमात्रग्रहणमुपलक्षणार्थं, तेन दंशमशकादिपरितापकारणस्य सर्वस्यैवेदमुपलक्षणं, यथा काकेभ्यो दधि रक्ष्यतामिति[१] ।

---

१ अत्र लक्षणया काकशब्दस्य दध्युपघातकोऽर्थः, ' मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया '' इति लक्षणालक्षणं काव्यप्रकाशग्रन्थे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुप्तिसमित्यविरोधिपरिग्रहनिवृत्तिपरिपूर्णब्रह्मचर्यमप्रार्थित–मोक्षसाधनं चारित्रानुष्ठानं यथाजातरूपमसंस्कृतमविकारं मिथ्यादर्शनाविष्टविद्विष्टं परममांगल्यं नाग्न्यमभ्युपगतस्य स्त्रीरूपाणि नित्याशुचिबीभत्सकुणपभावेन पश्यतो वैराग्यभावनावरुद्धमनोविक्रियस्यासंभावितमनुष्यत्वस्य नाग्न्यदोषासंस्पर्शात्परीषहजयसिद्धिरिति जातरूपधारणमुत्तमश्रेयःप्राप्तिकारणमित्युच्यते । इतरे पुनर्मनोविक्रियां निरोद्धुमसमर्थास्तत्पूर्विकामंगविकृतिं निगूहितुकामाः कौपीनफलकचीवराद्यावरणमातिष्ठन्तेऽङ्गसंवरणार्थमेव, तन्न कर्मसंवरणकारणम् ।

संयतस्य क्षुधाद्याऽऽबाधासंयमपरिरक्षणेंद्रियदुर्जयत्त्वव्रतपरिपालनभारगौरवसर्वदाऽप्रमत्तत्त्वदेशभाषांतरानभिज्ञत्त्वविषमचपलसत्त्वप्रचुरभीमदुर्गनियतैकविहारत्वादिभिररतिं प्रादुष्यन्तीं (?) धृतिविशेषान्निवारयतः संयमे रतिभावनाद्विषयसुखरतिमतिविषमाहारसेवेव विपाककटुकेति चिन्तयतोऽरतिपरीषहबाधाऽभावादरतिपरीषहजय इति निश्चीयते ।

एकान्ते भवनारामादिप्रदेशे रागद्वेषयौवनदर्परूपमदविभ्रमोन्मादमद्यपानाऽऽवेशादिभिः प्रमदासु बाधमानासु तदक्षिवक्त्रभ्रूविकारशृंगाराकारविहारहावविलासहासलीलाविजृंभितकटाक्षविक्षेपसुकुमार–स्निग्धमृदुपीनोन्नतस्तनकलशनितान्तताम्राधरपृथुजघनरूपगुणाभरणगन्धवस्त्रमाल्यादीन्प्रत्यनगृहीतमनोविप्लुतेर्दर्शनाभिलाषनिरुत्सुकस्य स्निग्धमृदुविशदसुकुमाराभिधानतंत्रीवंशामिश्रमधुरगीतश्रवणानिवृत्ता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दरश्रोत्रस्य कूर्मवत्संवृतेन्द्रियहृदयविकारस्य ललितस्मितमृदुकथितसविकारवीक्षणप्रहसनमदमंथरगमनमन्मथशरव्यापारविफलीकरणचरणस्य संसारार्णवव्यसनपातालरौद्रदुःखागाधाऽऽवर्त्तकुटिलाध्यायिनः स्त्रैणानर्थनिवृत्तिः स्त्रीपरीषहजय इति कथ्यते। अन्यवादिपरिकल्पिता देवताविशेषा ब्रह्मादयस्तिलोत्तमादिदेवगणिकारूपसंपद्दर्शनलोललोचनविकाराः स्त्रीपरीषहपंकान्नोद्धर्तुमात्मानं समर्थाः।

दीर्घकालाऽभ्यस्तगुरुकुलब्रह्मचर्यस्याधिगतबंधमोक्षपदार्थतत्त्वस्य कषायनिग्रहपरस्य भावनार्पितमनसः संयमायतनादिभक्तिहेतोर्देशान्तरातिथेर्गुरुणाऽभ्यनुज्ञातस्य नानाजनपदव्याहारव्यवहाराभिज्ञस्य ग्राम एकरात्रं नगरे पंचरात्रं प्रकर्षेणावस्थातव्यमित्येवं यातस्य वायोरिव निःसंगतामुपगतस्य देशकालप्रमाणोपेतमध्वगमनमनुभवतः क्लेशाक्षमस्य भीमाटवीप्रदेशेषु निर्भयत्वात्सिंहस्येव सहायकृत्यमनपेक्षमाणस्य परुषशर्कराकंटकादिव्यथनजातपादखेदस्यापि सतः पूर्वोचितयानवाहनादिगमनमस्मरतः सम्यक् चर्यादोषं परिहरतः चर्यापरीषहजयो वेदितव्यः।

श्मशानोद्यानशून्यायतनगिरिगुहागह्वरादिष्वनभ्यस्तपूर्वेषु विदितसंयमक्रियस्य धैर्यसहायस्योत्साहवतो निषद्यामधिरूढस्य प्रादुर्भूतोपसर्गोग्ररोगविकारस्यापि सतस्तत्प्रतिदेशादविचलतो मंत्रविद्यादिलक्षणप्रतीकारानपेक्षमाणस्य क्षुद्रजन्तुप्रायविषमदेशाश्रयात्काष्ठोपलनिश्चलस्यानुभूतमृदुसंस्तरणादिस्पर्शसुखमवगणयतः प्राणिपीडापरिहारोद्यतस्य ज्ञानध्यानभावनाधीनधियः संकल्पितवीरासनोत्कुटिकासनादिरतेरासनदोषजयान्निषद्यातितिक्षेत्याख्यायते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वाध्यायध्यानाध्वश्रमपरिखेदितस्य खरविषमप्रचुरशर्कराकपाल-संकटातिशीतोष्णेषु भूमिप्रदेशेषु मौहूर्त्तिकीं निद्रामनुभवतो यथाऽऽ-कृतैकपार्श्वदंडायतादिशायिनः संजातबाधाविशेषस्य संयमार्थम-स्पन्दमानस्यानुतिष्ठतो व्यन्तरादिभिर्वा वित्रास्यमानस्य पलायनं प्रति निरुत्सुकस्य मरणभयनिर्विशंकस्य निपतितदारुवत् व्यपगता-सुवच्च परिवर्त्तमानस्य द्वीपिशार्दूलमहोरगादिदुष्टसत्त्वपरिचरितोऽयं प्रदेशोऽचिरादतो निर्गमनं श्रेयः कदा नु रात्रिर्विरमतीति विषाद-मनाददानस्य सुखप्राप्तावप्यपरितुष्यतः पूर्वानुभूतनवनीतवन्मृदुशय-नमननुस्मरतः सम्यगागमोदितशयनादप्रच्यवतः शय्यासहनमिति तत्प्रत्येतव्यम् ।

तीव्रमोहाऽऽविष्टमिथ्यादृष्टचनार्यम्लेच्छखलपापाचारमत्तोद्दृप्तशं-कितप्रयुक्त 'मा' शद्बपरुषावज्ञानाक्रोशादीन्कर्णमूले गतान् हृदयशूलो-द्भावकान् क्रोधज्वलनशिखाप्रवर्द्धनकरानभिप्रायान् शृण्वतोऽपि दृढ-मनसो दुर्भाषिणो भस्मसात्कर्त्तुमपि समर्थस्य परमार्थावहितचेतसः शब्दमात्रश्राविणस्तदर्थान्वीक्षणविनिवृत्तव्यापारस्य स्वकृताशुभकर्मो-दयो ममैष यतोऽमीषां मां प्रति द्वेष इत्येवमादिभिरुपायैरनिष्टवचन-सहनमाक्रोशपरीषहजय इति निर्णीयते ।

ग्रामोद्याननगराटवीपुरेषु नक्तं दिवा चैकाकिनो निरावरणमूर्त्तेः समन्तात्पर्यटद्भिश्चौरारक्षकम्लेच्छचारपुरुषबधिरपूर्वापकारिद्विषत्पर-लिंगिभिराहितक्रोधैस्ताडनाकर्षणबन्धनशस्त्राभिघातादिभिर्मार्यमाण-स्यानुत्पन्नवैरस्यावश्यं प्रपातुकमेवेदं शरीरं कुशलद्वारेणानेनापनीयते न मम व्रतशीलभावनाभ्रंशनमिति भावशुद्धस्य दह्यमानस्यापि सतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुगन्धमुत्सृजतश्चन्दनस्येव शुभपरिणामस्य स्वकर्मनिर्जरामभिसंदधानस्य दृढमतेः क्षमौषधिबलस्य मारकेषु सुहृत्स्विवामर्षापोहंभावनं वधमर्षणमित्याम्नायते ।

क्षुदध्वपरिश्रमतपोरोगादिभिरप्रच्यवितवीर्यस्य शुष्कपादपस्येव निरार्द्रमूर्त्तेरुन्नतास्थिस्नायुजालस्य निम्नाक्षपुटपरिशुष्काधरक्षामपांडुकपोलस्य चर्मवत्संकुचितांगोपाङ्गत्वचः शिथिलजानुगुल्फकटिबाहुयंत्रस्य देशकालक्रमोपपन्नकल्पादायिनो वाचंयमस्य मौनिसमस्य वा शरीरसन्दर्शनमात्रव्यापारस्योर्जितसत्त्वस्य प्रज्ञाऽऽधायितचेतसः प्राणात्ययेऽपि वसत्याहारभेषजानि दीनाभिधानमुखवैवर्ण्याङ्गसंज्ञादिभिरयाचमानस्य भिक्षाकालेऽपि विद्युदुद्योतवदुपलक्षितमूर्त्तेः बहुषु दिवसेषु रत्नवणिजो मणिसन्दर्शनमिव स्वशरीरप्रकाशमकृपणं मन्यमानस्य वन्दमानं प्रति स्वकरविकासनमिव पाणिपुटधारणमदीनमिति गणयतो याचनासहनमवसीयते । अद्यत्वे पुनः कालदोषाद्दीनानाथपाखण्डिबहुले जगत्यमार्गज्ञैरनात्मवद्भिर्याचनमनुष्ठीयते ।

वायुवदसंगानेकदेशचारिणोऽप्रकाशितवीर्यस्याभ्युपगतैककालभोजनस्य सकृन्मूर्त्तिसन्दर्शितव्रतकालस्य 'देहि' इत्यसभ्यवाक्प्रयोगादुपरतस्यानुपात्तविग्रहप्रतिक्रियस्याद्येदं श्वश्चेदमिति व्यपेतसङ्कल्पस्यैकस्मिन् ग्रामेऽलब्धे सति ग्रामान्तरान्वेषणनिरुत्सुकस्य पाणिपुटमात्रपात्रस्य बहुषु दिवसेषु बहुषु च गृहेषु भिक्षामनवाप्याप्यसंक्लिष्टचेतसो नाऽयं दाता तत्राऽन्यो दानशूरोऽतिधन्यो वदान्योऽस्तीति व्यपगतपरीक्षस्य लाभादप्यलाभो मे परं तप इति संतुष्टस्यालाभविजयोऽवसेयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुःखाधिकरणमशुचिभाजनं जीर्णवस्त्रवत्परिहेयं पित्तमारुतकफसन्निपातनिमित्तानेकामयवेदनाऽभ्यर्दितमन्यदीयमिव विग्रहं मन्यमानस्योपेक्षकत्वादप्रच्युतेश्चिकित्साव्यावृत्तचेष्टस्य शरीरयात्राप्रसिद्धये व्रणानुलेपनवद्व्यथोक्तमाहारमाचरतो विरुद्धाहारसेवाविरसवैषम्यजनितवातादिविकाररोगस्य युगपदनेकशतसंख्याव्याधिप्रकोपे सत्यऽपि तद्वशवर्त्तितां विजहतो जल्लौषधिप्राप्ताद्यनेकतपोविशेषर्द्धियोगे सत्यपि शरीरनिःस्पृहत्वात्प्रतीकारानपेक्षिणः पूर्वकृतपापकर्मणः फलमिदमनेनोपायेनाऽनृणी भवामीति चिन्तयतो रोगसहनं सम्पद्यते ।

यथाऽभिनिवृत्ताधिकरणशायिनः शुष्कतृणपरुषशर्कराभूमिकंटफलकशिलातलादिषु प्रासुकेष्वसंस्कृतेषु व्याधिमार्गगमनशीतोष्णजनितश्रमविनोदार्थं शय्यां निषद्यां वा भजमानस्य संस्कृतशुष्कतृणादिबाधितमूर्त्तेरुत्पन्नकंडूविकारस्य दुःखमनभिचिन्तयतस्तृणादिस्पर्शबाधाभिरवशीकृतत्वात्तृणस्पर्शसहनमवगन्तव्यम् ।

जलजन्तुपीडापरिहारायास्नानप्रतिज्ञस्य स्वेदपंकादिग्धसर्वांगस्य वादरनिगोदप्रतिष्ठितजीवदयार्थं च शरीरसंस्कारविरमणार्थं च परित्यक्तोद्वर्त्तनस्य सिध्मकच्छुदद्रूदीर्णकायस्य नखरोमश्मश्रुकेशविकृतसहजबाह्यमलसम्पर्ककारणानेकत्वग्विकारस्य स्वांगमलापचये परमलापचये वाप्रणिहितचेतसः संकल्पितसंज्ञानचारित्रविमलसलिलप्रक्षालनेन कर्ममलपंकापनोदायैवोद्यतस्य पूर्वानुभूतस्नानानुलेपनादिस्मररणपराङ्मुखचित्तवृत्तेर्मलधारणमाख्यायते । केशलुञ्चने तत्संस्काराकरणे महान्खेदः संजायते तत्सहनमपि मलधारणेऽन्तर्भवतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिरोषितब्रह्मचर्यस्य महातपस्विनः स्वपरसमयनिश्चयज्ञस्य हितोपदेशपरस्य कथामार्गकुशलस्य बहुकृत्वः परवादिविजयिनः प्रणामभक्तिसंभ्रमाऽऽसनप्रदानादीनि मे न कश्चित्करोतीत्येवमचिन्तयतो मानावमानयोः समानमनसः सत्कारपुरस्कारनिराकांक्षस्य श्रेयोध्यायिनः सत्कारपुरस्कारजयो वेदितव्यः। सत्कारः प्रशंसादिकः, पुरस्कारो नाम नन्दीश्वरादिपर्वयात्रात्मकक्रियारंभादिष्वग्रतः करणमामंत्रणं वा।

अंगपूर्वप्रकीर्णकविशारदस्य कृत्स्नग्रन्थार्थधारिणोऽनुत्तरवादिनस्त्रिकालविषयार्थविदः शब्दन्यायाऽध्यात्मनिपुणस्य मम पुरस्तादितरे भास्करप्रभाभिभूतोद्योतवन्नितरामवभासत इति विज्ञानमदनिरासः प्रज्ञापरीषहजयः प्रत्येतव्यः।

अज्ञोऽयं न किंचिदपि वेत्ति पशुसम इत्येवमाद्यधिक्षेपवचनं सहमानस्याध्ययनार्थग्रहणपराभिभवादिष्वनासक्तबुद्धेश्चिरप्रव्रजितस्य विविधतपोविशेषभाराक्रान्तमूर्त्तेः सकलसामर्थ्याप्रमत्तस्य विनिवृत्तानिष्टमनोवाक्कायचेष्टस्याद्याऽपि मे ज्ञानातिशयो नोत्पद्यत इत्येवं मनस्यसन्दधतोऽज्ञानपरीषहजयोऽवगन्तव्यः।

संयमिप्रधानस्य दुष्करतपोऽनुष्ठायिनः परमवैराग्यभावनाशुद्धहृदयस्य विदितसकलपदार्थतत्त्वस्यार्हदायतनसाधुधर्मपूजकस्य चिरन्तनप्रव्रजितस्याद्यापि मे ज्ञानातिशयो नोत्पद्यते महोपवासाद्यनुष्ठायिनां प्रातिहार्यविशेषाः प्रादुरभूवन्निति प्रलापमात्रमिदमनर्थकेयं प्रव्रज्या विफलं व्रतपालनमित्येवं मानसमनादधानस्य दर्शनविशुद्धियोगाददर्शनपरीषहसहनमवसातव्यम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं परीषहानसंकल्पितोपस्थितान् सहमानस्यासंक्लिष्टचेतसो रागादिपरिणामास्रवाभावान्महान् संवरो भवति । एते सर्वेऽपि परीषहाः कर्मोदयजनितास्तद्यथा---

ज्ञानावरणे प्रज्ञाऽज्ञाने, दर्शनमोहान्तराययोरदर्शनालाभौ, चारित्रमोहे मानकषायोदये नाग्न्यनिषद्याऽऽक्रोशयाचनासत्कार-पुरस्काराः, अरतिवेदयोररतिस्त्रीपरीषहौ, वेदनीये क्षुत्पिपासाशीतो-ष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्शमलाः ।

एकस्मिन् जीव एकस्मिन् काले एकादयः परीषहा आ एकोन-विंशतेर्युगपद्भवन्ति । तद्यथा—शीतोष्णपरीषहयोरेकतरः, शय्या-चर्यानिषद्यानाञ्चान्यतम एव भवति । श्रुतज्ञानापेक्षया प्रज्ञाप्रकर्षे सत्यवध्यभावापेक्षयाऽज्ञानोपपत्तेः सहावस्थाविरोधो न भवति ।

मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यङ्मिथ्यादृष्टचसंयतसम्यग्दृष्टि-संयतासंयतप्रमत्तसंयताप्रमत्तसंयतेषु सप्तसु गुणस्थानेषु सर्वे परी-षहाः सन्ति । अदर्शनपरीषहं विनाऽपूर्वकरण एकविंशतिपरीषहा भवन्ति । अरतिपरीषहमन्तरेण सवेदानिवृत्तौ विंशति परीषहाः स्युः । अवेदानिवृत्तौ स्त्रीपरीषहे नष्ट एकोनविंशतिपरीषहा भवेयुः । तस्यैव मानकषायोदयक्षयान्नाग्न्यनिषद्याऽऽक्रोशयाचनासत्कारपुरस्कारा वि-नश्यन्ति । तेषु विनष्टेषु अनिवृत्तिसूक्ष्मसाम्परायोपशान्तकषायक्षीण-कषायेषु चतुर्षु गुणस्थानेषु चतुर्दश परीषहाः सन्ति । क्षीणकषाये प्रज्ञाऽज्ञानालाभा विनश्यन्ति । सयोगिभट्टारकस्य ध्यानानलनिर्दग्ध-घातिकर्मेन्धनस्यानन्ताप्रतिहतज्ञानादिचतुष्टयस्यान्तरायाभावान्निर-न्तरमुपचीयमानशुभपुद्गलसन्ततेर्वेदनीयाख्यं कर्म विद्यमानमपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रक्षीणघातिसहायबलं स्वप्रयोजनोत्पादनं प्रत्यसमर्थं, यथा—विषद्रव्यं मंत्रौषधिबलादुपक्षीणमारणशक्तिकमुपयुज्यमानं न मारणाय समर्थं, यथा छिन्नमूलतरुः कुसुमफलप्रदो न भवति, यथोपेक्षावतोरनिवृत्तिसूक्ष्मसाम्परराययोर्मैथुनपरिग्रहसंज्ञा, यथा च परिपूर्णज्ञान एकाग्रचिन्तानिरोधाऽभावेपि कर्मरजोविधूननफलसंभवाद्ध्यानोपचारः, तथा क्षुधारोगवधादिवेदनासद्भावपरीषहाभावे वेदनीयकर्मोदयद्रव्यपरीषहसद्भावादेकादश जिने सन्तीत्युपचारो युक्तः वेद्यकर्मोदयसद्भावादेकादश जिने सन्ति । घातिकर्मबलसहायरहितं वेद्यं फलवन्न भवति तेनैकादश जिने सन्ति । एवं सति स्यादस्ति स्यान्नास्तीति स्याद्वाद उपपन्नो भवति । तथा च शतकस्य प्रदेशबन्धे वेदनीयस्य भागविशेषकारणकथनेऽप्युक्तम् । " जम्हा वेदणीयस्स सुहदुक्खोदयस्स णाणावरणादि उपकरणकरणं तम्हा वेदणीयस्सेव सुहदुक्खोदयोद्दीसदे " इति । तस्माद्वेदनीयं घातिकर्मोदयं विना फलवन्न भवतीति सिद्धम् ।

नरकतिर्यग्गत्योः सर्वे परीषहाः, मनुष्यगतावाद्यभंगा भवन्ति, देवगतौ घातिकर्मोत्थपरीषहैः सह वेदनीयोत्पन्नक्षुत्पिपासावधैः सह चतुर्दश भवन्ति । इन्द्रियकायमार्गणयोः सर्वे परीषहाः सन्ति, वैक्रियकद्वितयस्य देवगतिभंगा तिर्यङ्मनुष्यापेक्षया द्वाविंशतिः । शेषयोगानां वेदादिमार्गणानां च स्वकीयगुणस्थानभंगा भवन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तपोवर्णनम्।

रत्नत्रयाविर्भावार्थमिच्छानिरोधस्तपः,। अथवा कर्मक्षयार्थं मार्गाविरोधेन तप्यत इति तपः। तद्द्विविधं, बाह्यमाभ्यन्तरञ्च। अनशनादिबाह्यद्रव्यापेक्षत्वात्परप्रत्ययलक्षणत्वाच्च बाह्यं, तत् षड्विधं, अनशनावमोदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशभेदात्। अभ्यन्तरमपि षड्विधं, प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानभेदात्।

तत्राऽनशनं नाम यत्किंचिदृष्टफलं मंत्रसाधनाद्यनुद्दिश्य क्रियमाणमुपवसनमनशनामित्युच्यते। तत्किमर्थं प्राणेन्द्रियसंयमप्रसिद्धिरागद्वेषाद्युच्छेदबहुकर्मनिर्जरणशुभध्यानागमावाप्त्यर्थं। तद्द्विविधमवधृतानवधृकालभेदात्। तत्रावधृतकालं सकृद्भोजनचतुर्थषष्ठाष्टमदशमद्वादशपक्षमासर्त्वयनसंवत्सरेष्वशनपानखाद्यस्वाद्यलक्षणचतुर्विधाहारनिवृत्तिः। अनवधृतकालमादेहोपरमात्।

आत्मीयप्रकृत्यौदनस्य चतुर्थभागेनार्द्धेन ग्रासेण वोनाहारनियमोऽवमोदर्यं। अवमोदर्यमिति च तत्किमर्थं निद्राजयार्थं दोषप्रशमनार्थमतिमात्राऽऽहारजातविहितस्वाध्यायभयार्थमुपवासश्रमसमुद्भूतवातपित्तप्रकोपपरिहीयमानसंयमसंरक्षणार्थं च।

स्वकीयतपोविशेषेण रसरुधिरमांसशोषणद्वारेणेन्द्रियसंयमं परिपालयतो भिक्षार्थिनो मुनेरेकागारसप्तवेश्मैकरथ्यार्द्धग्रामदातृजनवेषगृहभाजनभोजनादिविषयसंकल्पो वृत्तिपरिसंख्यानमाशानिवृत्त्यर्थमवगन्तव्यम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शरीरेन्द्रियरागादिवृद्धिकरक्षीरदधिघृतगुडतैलादिरसत्यजनं रसपरित्याग इत्युच्यते । तत्किमर्थं दुर्दान्तेन्द्रियतेजोहानिः संयमोपरोधनिवृत्तिरित्येवमाद्यर्थम् ।

ध्यानाध्ययनविघ्नकरस्त्रीपशुषण्ढकादिपरिवर्जितगिरिगुहाकन्दरपितृवनशून्यागाराऽऽरामोद्यानादिप्रदेशेषु विविक्तेषु जन्तुपीडारहितेषु संवृतेषु संयतस्य शयनासनं विविक्तशय्यासनं नाम । तत्किमर्थमाबाधात्ययब्रह्मचर्यस्वाध्यायध्यानादिप्रसिद्ध्यर्थमसभ्यजनदर्शनेन तत्सहवासेन वा जनितत्रिकालविषयरागद्वेषमोहापोहार्थं वा ।

वृक्षमूलाभ्रावकाशाऽऽतापनयोगवीरासनकुक्कुटासनपर्यङ्कार्द्धपर्यङ्कगोदोहनमकरमुखहस्तिशुण्डामृतकशयनैकपार्श्वदंडधनुशय्यादिभिः शरीरपरिखेदः कायक्लेश इत्युच्यते । तत्किमर्थं वर्षाशीताऽऽतपविषमसंस्थुलाऽऽसनविषमशय्यादिषु शुभध्यानपरिचर्यार्थं दुःखोपनिपाततितिक्षार्थं विषयसुखानभिष्वंगार्थं प्रवचनप्रभावनाद्यर्थं च कायक्लेशानुष्ठानं क्रियते । इतरथा हि ध्यानप्रवेशकाले सुखोचितः स्यात्, द्वन्द्वोपनिपाते सति समाधानं न स्यात् । एवं षड्विधं बाह्यलक्षणमुक्तम् ।

उत्तरमाभ्यन्तरमुच्यते । यतोऽन्यैस्तीर्थैरनभ्यस्तं ततोऽस्याऽऽभ्यन्तरत्वं, प्रायश्चित्तादितपो हि बाह्यद्रव्यानपेक्षत्वादन्तःकरणव्यापाराच्चाभ्यन्तरं । तत्र कर्तव्यस्याकरणे वर्जनीयस्यावर्जने यत्पापं सोऽतीचारस्तस्य शोधनं प्रायश्चितं । तत्किमर्थं प्रमाददोषव्युदासो भावप्रसादो नैःशल्यमनवस्थाव्यावृत्तिर्मर्यादात्यागः संयमदार्ढ्यं चतुर्विधाराधनमित्येवमादीनां सिद्ध्यर्थं प्रायश्चित्तं । तद्दशविधं;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आलोचनं, प्रतिक्रमणं, तदुभयं, विवेकः, व्युत्सर्गः, तपः, छेदः, मूलं, परिहारः, श्रद्धानमिति । तत्रैकान्तनिषण्णायापरिश्राविणे श्रुतरहस्याय गुरवे प्रसन्नमनसे विद्यायोग्योपकरणग्रहणादिषु प्रश्नविनयमन्तरेण प्रवृत्तस्य विदितदेशकालस्य शिष्यस्य सविनयमात्मप्रमादनिवेदनमालोचनमित्युच्यते । तस्य दश दोषा भवन्ति; आकम्पितं, अनुमापितं, यद्दृष्टं, वादरं, सूक्ष्मं, छन्नं, शब्दाऽऽकुलितं, बहुजनं, अव्यक्तं, तत्सेवितमिति । तत्रोपकरेषु दत्तेषु प्रायश्चित्तं मे लघु कुर्वीतेति विचिन्त्य भयदादानं प्रथम आकंपितदोषः। प्रकृत्या पित्ताधिकोऽस्मि दुर्बलोऽस्मि ग्लानोऽस्मि नाऽलमहमुपवासादिकं कर्त्तुं यदि लघु दीयेत तद्दोषनिवेदनं करिष्य इति वचनं द्वितीयोऽनुमापितदोषः । अन्यादृष्टदोषगूहनं कृत्वा दृष्टदोषनिवेदनं मायाचारस्तृतीयो यद्दृष्टदोषः । आलस्यात्प्रमादज्ञानाद्वाऽल्पापराधावबोधनिरुत्सुकस्य स्थूलदोषप्रतिपादनं तुर्यो वादरदोषः । महादुश्चरप्रायश्चित्तभयाद्वाऽहो सूक्ष्मदोषपरिहारकोयऽमिति स्वगुणाख्यापनचिकीर्षया वा महादोषसंवरणं कृत्वा तनुप्रमादाचारानिवेदनं पंचमः सूक्ष्मदोषः । ईदृशे व्रतातीचारे सति नुः किं स्यात्प्रायश्चित्तमित्युपायेन गुरूपासना षष्ठश्छन्नदोषः । पाक्षिकचातुर्मासिकसांवत्सरिकेषु कर्मसु महति यतिसमवाय आलोचनशब्दाकुले पूर्वदोषकथनं सप्तमः शब्दाकुलितदोषः । गुरूपपादितं प्रायश्चित्तं किमिदं युक्तमागमे स्यान्नवेति यावल्लघु प्रतिपादयति तावद्वा शङ्कमानस्याऽन्यसाधुपरिप्रश्नोऽष्टमो बहुजनदोषः । यत्किंचित्प्रयोजनमुद्दिश्याऽऽत्मना समानायैव प्रमादाचारितमावेद्य महदपि गृहीतं

प्रायश्चित्तं न फलकरमिति नवमोऽव्यक्तदोषः । अस्यापराधेन ममातीचारः समानस्तमयमेव वेत्यस्मै यद्दत्तं तदेव मे युक्तं लघु कर्त्तव्यमिति स्वदुश्चरितसंवरणं दशमस्तत्सेवितदोषः । आत्मन्यपराधं चिरमनवस्थाप्य निकृतिभावमन्तरेण बालवदृजुबुद्धेर्दोषान्निवेदयतो न ते दोषा भवन्त्यन्यच्च संयतालोचनमेकान्ते द्विविषयमिष्टं, संयतिकाऽऽलोचनं प्रकाशे त्रपाश्रयमिष्टं, लज्जापरपरिभवादिगणनया निवेद्यातीचारं न शोधयेदपरीक्षिताऽऽयव्ययोऽधमर्णवदवसीदति । महदपि तपःकर्मानालोचनपूर्वकं नाभिप्रेतफलप्रदं सामदेहगतौषधिवत् । कृताऽऽलोचनोऽपि गुरुमतं प्रायश्चित्तमकुर्वाणो विनिश्चितमात्रनुष्ठानशून्यराज्यवन्महतीं शाश्वतीं च संपदं न प्राप्नोति । कृतालोचनचित्तगतं प्रायश्चित्तं परिमृष्टदर्पणगतरूपवत्परिभ्राजते ।

आस्थितानां योगानां धर्मकथादिव्याक्षेपहेतुसन्निधानेन विस्मरणे सत्यालोचनं पुनरनुष्ठाय कस्य संवेगनिर्वेदपरस्य गुरुविरहितस्याल्पापराधस्य पुनर्न करोमि मिथ्या मे दुष्कृतमित्येवमादिभिर्दोषान्निवर्त्तनं प्रतिक्रमणं ।

किंचित्कर्माऽऽलोचनमात्रादेव शुद्ध्यत्यपरं प्रतिक्रमणेनेतरं दुःस्वप्नादिकं तदुभयसंसर्गेण शुद्धिमुपयाति । आलोचनप्रतिक्रमणपूर्वं गुरुणाऽभ्यनुज्ञातं शिष्येणैव कर्तव्यं, तदुभयं पुनर्गुरुणैवानुष्ठेयम् ।

संसक्तेषु द्रव्यक्षेत्रान्नपानोपकरणादिषु दोषान्निवर्त्तयितुमलभमानस्य तद्द्रव्यादिविभजनं विवेकः । अथ वा शक्त्यनगूहनेन प्रयत्नेन परिहरतः कुतश्चित्कारणादप्रासुकग्रहणग्राहणयोः प्रासुकस्यापि प्रत्याख्यातस्य विस्मरणात्प्रतिगृहे च स्मृत्वा पुनस्तदुत्सर्जनं विवेकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुःस्वप्नदुश्चिन्तनमलोत्सर्जनाऽऽगमातीचारनदीमहाटवीरणादिभिरन्यैश्चाप्यतीचारे सति ध्यानमवलंब्य कायमुत्सृज्यान्तर्मुहूर्तदिवसपक्षमासादिकालावस्थानं व्युत्सर्ग इत्युच्यते ।

सत्त्वादिगुणालंकृतेन कृतापराधेनोपवासैकस्थानाचाम्लनिर्विकृत्यादिभिः क्रियमाणं तप इत्युच्यते । भयोन्मादत्वरणविस्मरणानवबोधाशक्तिव्यसनादिभिर्महाव्रतातीचारे सत्यनन्तरोक्तषड्विधप्रायश्चित्तं भवति । चिरप्रव्रजितस्य सहजबलस्य स्वभावशूरस्य गर्वितस्य कृतदोषस्य दिवसमासादिभागेन प्रव्रजनं छित्वा छिन्नकालादिनाऽवस्थानं छेदो नाम ।

पार्श्वस्थादीनां मूलं प्रायश्चितं, तद्यथा—पार्श्वस्थः कुशीलः, संसक्तः, अवसन्नः, मृगचारित्र इति । तत्र यो वसतिषु प्रतिबद्ध उपकरणोपजीवी च श्रमणानां पार्श्वे तिष्ठतीति पार्श्वस्थः । क्रोधादिकषायकलुषितात्मा व्रतगुणशीलैः परिहीणः संघस्यानयकारी कुशीलः । मंत्रवैद्यकज्योतिष्कोपजीवी राजादिसेवकः संसक्तः । जिनवचनानभिज्ञो मुक्तचारित्रभारो ज्ञानाचरणभ्रष्टः करणालसोऽवसन्नः । त्यक्तगुरुकुल एकाकित्वेन स्वच्छन्दविहारी जिनवचनदूषको मृगचारित्रः स्वच्छन्द इति वा । एते पंच श्रमणा जिनधर्मबाह्याः । एवमुक्तपार्श्वस्थादिपंचविधोन्मार्गस्थितस्यापरिमितापराधस्य सर्वं पर्यायमपहाय पुनर्दीक्षादानं मूलमित्युच्यते ।

परिहारोऽनुपस्थानपारंचिकभेदेन द्विविधः । तत्राऽनुपस्थानं निजपरगणभेदाद्द्विविधं । प्रमादादन्यमुनिसंबंधिनमृषिं छात्रं गृहस्थं वा परपाखंडिप्रतिबद्धचेतनाचेतनद्रव्यं वा परस्त्रियं वा

स्तेनयतो मुनीन् प्रहरतो वाऽन्यदप्येवमादिविरुद्धाचरितमाचरतो नवदशपूर्वधरस्यादित्रिकसंहननस्य जितपरीषहस्य दृढधर्मिणो धीरस्य भवभीतस्य निजगुणानुपस्थापनं प्रायश्चित्तं भवति । तेन ऋष्याश्रमाद्द्वात्रिंशद्दंडान्तरं विहितविहारेण बालमुनीनपि वंदमानेन प्रतिवन्दनाविरहितेन गुरुणा सहाऽऽलोचयता शेषजनेषु कृतमौनव्रतेन विधृतपराङ्मुखपिच्छेन जघन्यतः पंचपंचोपवासा उत्कृष्टतः षण्मासोपवासाः कर्त्तव्याः, उभयमप्याद्द्वादशवर्षादिति । दर्पादनन्तरोक्तान्दोषानाचरतः परगणोपस्थापनं प्रायश्चित्तं भवतीति । स सापराधः स्वगणाचार्येण परगणाचार्यं प्रति प्रहेतव्यः, सोऽप्याचार्यस्तस्यालोचनमाकर्ण्य प्रायश्चित्तमदत्त्वाऽऽचार्यान्तरं प्रस्थापयति, सप्तमं यावत् पश्चिमश्च प्रथमाऽऽलोचनाऽऽचार्यं प्रति प्रस्थापयति, स एव पूर्वः पूर्वोक्तप्रायश्चित्तेनैनमाचारयति ।

परिहारस्य प्रथमभेदो द्विविधो गतः । पारंचिकमुच्यते, तीर्थकरगणधरगणिप्रवचनसंघाद्यासादनकारकस्य नरेन्द्रविरुद्धाचरितस्य राजानमभिमतामात्यादीनां दत्तदीक्षस्य नृपकुलवनितासेवितस्यैवमाद्यन्यैर्दोषैश्च धर्मदूषकस्य पारंचिकं प्रायश्चित्तं भवति । चातुर्वर्ण्यश्रमणाः संघं संभूय तमाहूय 'एष महापातकी समयबाह्यो न वंद्य' इति घोषयित्वा दत्त्वाऽनुपस्थानं प्रायश्चित्तं देशान्निर्घाटयन्ति ।

मिथ्यात्वं गत्वा स्थितस्य पुनरपि गृहीतमहाव्रतस्याऽऽप्ताऽऽगमपदार्थानां श्रद्धानमेव प्रायश्चित्तं, तदेतद्दशविधं, देशकालशक्तिसंयमाद्यविरोधेनाल्पानल्पापराधानुरूपं दोषप्रशमनं चिकित्सितवद्विधेयं । जीवस्याऽसंख्येयलोकमात्रपरिमाणाः परिणामविकल्पा अपराधाश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावत एव न तेषां तावद्विकल्पं प्रायश्चित्तमस्ति व्यवहारनयापेक्षया पिंडीकृत्य प्रायश्चित्तविधानमुक्तम् ।

कषायेन्द्रियविनयनं विनयः, अथवा रत्नत्रयस्य तद्वतां च नीचैर्वृत्तिर्विनयः, स चतुःप्रकारः । ज्ञानविनयो दर्शनविनयश्चारित्रविनय उपचारविनयश्चेति । तत्राऽनालसेन शुद्धमनसा देशकालादिविशुद्धिविधानविचक्षणेन सबहुमानेन यथाशक्ति निषेव्यमाणो मोक्षार्थं ज्ञानग्रहणाभ्यासस्मरणादिर्ज्ञानविनयः । सामायिकादौ लोकविन्दुसारपर्यंते श्रुतसमुद्रे ये यथा भगवद्भिरुपदिष्टाः पदार्थास्तेषां तथा श्रद्धाने निःशंकितत्त्वादिलक्षणोपेतता दर्शनविनयः । ज्ञानदर्शनचारित्रतपोवीर्यवतो दुश्चरचरणश्रमणानंतरमुद्भिन्नरोमांचाभिव्यज्यमानान्तर्भक्तेः परं प्रसादमस्तकांजलिकरणादिभिर्भावयतश्चानुष्ठातृत्वं चारित्रविनयः । उपचारविनयो द्विविधः, प्रत्यक्षः परोक्ष इति । तत्राऽऽचार्योपाध्यायस्थविरप्रवर्त्तकगणधरादिषु पूजनीयेष्वभ्युत्थानमभिगमनमंजलिकरणं वंदनाऽनुगमनं रत्नत्रयबहुमानः सर्वकालयोग्यानुरूपक्रियाऽनुलोमता सुनिगृहीतत्रिदंडता सुशीलयोगता धर्मानुरूपकथाकथनश्रवणभक्तिताऽर्हदायतनगुरुभक्तिता दोषवद्वर्जनं गुणवृद्धसेवाऽभिलाषाऽनुवर्त्तनं पूजनं । यदुक्तं—"गुरुस्थविरादिभिर्नान्यथा तदित्यनिशं भावनं समेष्वनुत्सेको हीनेष्वपरिभवः जातिकुलधनैश्वर्यरूपविज्ञानबललाभर्द्धिषु निरभिमानता सर्वत्र क्षमापरता मितहितदेशकालाऽनुगतवचनता कार्याकार्यसेव्यासेव्यवाच्यावाच्यज्ञातृता इत्येवमादिभिरात्मानुरूपः प्रत्यक्षोपचारविनयः ।" परोक्षोपचारविनय उच्यते, परोक्षेष्वप्याचार्यादिष्वंजलिक्रियागुण-

संकीर्त्तनानुस्मरणाऽऽज्ञानुष्ठायित्वादिः कायवाङ्मनोभिरवगन्तव्यः, रागप्रहसनविस्मरणैरपि न कस्याऽपि पृष्ठमांसभक्षणं करणीयमेवमादिः परोक्षोपचारविनयः प्रत्येतव्यः । मंत्रौषधोपकरणयशः-सत्कारलाभाद्यानपेक्षितचित्तेन परमार्थनिस्पृहमतिनैहलौकिकफलनिरुत्सुकेन कर्मक्षयकांक्षिणा ज्ञानलाभाऽऽचारविशुद्धिसम्यगाराधनादिसिद्ध्यर्थं विनयभावनं कर्तव्यम् । ततश्चापवर्गद्वारं निरर्गलम् ।

वैयावृत्त्यमुच्यते । कायपीडादुष्परिणामव्युदासार्थं कायचेष्टया द्रव्यान्तरेणोपदेशेन च व्यावृत्तस्य यत्कर्म तद्वैयावृत्त्यं । तद्दशविधं, आचार्योपाध्यायतपस्विशैक्ष्यग्लानगणकुलसंघसाधुमनोज्ञवैयावृत्त्यभेदेन । यस्मात् सम्यग्ज्ञानादिपंचाचाराधारादाहृत्य व्रतानि स्वर्गापवर्गसुखकल्पकुजबीजानि भव्या आत्महितार्थमाचरन्ति स आचार्यः । विनयेनोपेत्य यस्माद्व्रतशीलभावनाऽधिष्ठानादागमं श्रुताभिधानमधीयते स उपाध्यायः । आचाम्लवर्द्धनसर्वतोभद्रसिंहनिष्क्रीडितशातकुंभमन्दरपंक्तिविमानपंक्तिनन्दीश्वरपंक्तिजिनगुणसंपत्तिश्रुतज्ञानकनकावलिमुक्तावलिमृदङ्गमध्यवज्रमध्यकर्मक्षपणत्रैलोक्यसारादिमहोपवासानुष्ठायी तपस्वी । श्रुतज्ञानशिक्षणपरोऽनुपरतव्रतभावनानिपुणशैक्षः । रुजादिभिः क्लिष्टशरीरो ग्लानः । स्थविराणां सन्ततिर्गणः । दीक्षकस्याऽऽचार्यस्य शिक्षस्याऽऽम्नायः कुलं । चातुर्वर्ण्यश्रमणनिवहः संघः । चिरकालभावितप्रव्रज्यागुणः साधुः । अभिरूपो मनोज्ञः, आचार्याणां संमतो वा दीक्षाभिमुखो वा मनोज्ञः, अथ वा विद्वान् वाग्मी महाकुलीन इति यो लोकस्य संमतः स मनोज्ञस्तस्य

१ कल्पवृक्ष ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रहणं प्रवचनस्य लोके गौरवोत्पादनहेतुत्वादसंयतसम्यग्दृष्टिर्वा संस्कारोपेतरूपत्वान्मनोज्ञः । आचार्यादीनां व्याधिपरीषहमिथ्यात्वाद्युपनिपाते सत्यप्रत्युपकाराशया प्रासुकौषधभुक्तिपानाऽऽश्रयपीठफलकसंस्तरादिभिर्धर्मोपकरणैस्तत्प्रतीकारः सम्यक्त्वप्रत्यवस्थापनमित्येवमादि वैयावृत्त्यं । बाह्यस्यौषधभुक्तिपानादेरसंभवे स्वकायेन श्लेष्मसिंघाणकान्तर्मलाद्यपकर्षणादि तदानुकूल्यानुष्ठानं च वैयावृत्त्यमिति कथ्यते, तत्पुनः किमर्थं समाध्याध्यानं विचिकित्साऽभावः प्रवचनवात्सल्यं सनाथता चेत्येवमाद्यर्थम् ।

स्वाध्यायो भण्यते । स्वस्मै हितोऽध्यायः स्वाध्यायः, स च वाचनापृच्छनाऽनुप्रेक्षाऽऽम्नायधर्मोपदेशभेदेन पंचविधः । तत्र निरपेक्षात्मना मुमुक्षुणा विदितवेदितव्येन निरवद्यस्य ग्रंथस्यार्थस्य तदुभयस्य वा पात्रं प्रति प्रतिपादनं वाचनेत्युच्यते । आत्मोन्नतिप्रकटनार्थं पराभिसंधनार्थमुपहाससंघर्षप्रहसनादिवर्जितः संशयच्छेदाय निश्चितबलाधानाय वा ग्रन्थस्यार्थस्य तदुभयस्य परं प्रति पर्यनुयोगः पृच्छना । अधिगतपदार्थप्रक्रियस्य तप्तायःपिंडवदर्पितचेतसो मनसाऽभ्यासोऽनुप्रेक्षा । व्रतिनो विदितसमाचारस्यैहलौकिकफलनिरपेक्षस्य द्रुतविलम्बितपदाक्षरच्युतादिघोषदोषविशुद्धं परिवर्त्तनमाम्नायः । दृष्टप्रयोजनपरित्यागादुन्मार्गनिवर्त्तनार्थं सन्देहव्यावर्तनार्थमपूर्वपदार्थप्रकाशनार्थं धर्मकथाद्यनुष्ठानं धर्मोपदेशः । किमर्थोऽयं स्वाध्यायः, प्रज्ञातिशयः प्रशस्ताध्यवसायः, प्रवचनस्थितिः, संशयोच्छेदः, परवादिशंकाऽभावः, प्रभावना, परमसंवेगः, तपोवृद्धिः, अतीचारविशुद्धिः, कषायेन्द्रियजयः, परमोपायः, इत्येवमाद्यर्थं स्वाध्यायोऽनुष्ठेयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कायोत्सर्ग उच्यते । विविधानां बाह्याभ्यन्तराणां बन्धहेतूनां दोषाणामुत्तमस्त्यागो व्युत्सर्गः । आत्मनाऽनुपात्तस्यैकत्वमनापन्न-स्याहारादेस्त्यागो बाह्योपधिव्युत्सर्गः । क्रोधमानमायालोभमिथ्या-त्वहास्यरत्यरतिशोकभयादिदोषनिवृत्तिराभ्यन्तरोपधिव्युत्सर्गः, काय-त्यागश्चाऽभ्यन्तरोपधिव्युत्सर्गः । स द्विविधः । यावज्जीवं, नियतकालश्चेति । तत्र यावज्जीवं त्रिविधः । भक्तप्रत्याख्यानेंगिनी-मरणप्रायोपगमनभेदात् । तत्र भक्तप्रत्याख्यानं जघन्येनान्तर्मुहूर्त-मुत्कृष्टेन द्वादशवर्षाणि, अवान्तरो मध्यम उभयोपकारसापेक्षं भक्त-प्रत्याख्यानमरणं । परप्रतीकारनिरपेक्षमात्मोपकारसापेक्षमिंगिनी-मरणं । उभयोपकारनिरपेक्षं प्रायोपगमनं । नियतकालो द्विविधः, नित्यनैमित्तिकभेदेन । नित्य आवश्यकादयः । नैमित्तिकः पार्वणी क्रिया निषद्याक्रियादयश्च । क्रियाकरणे वन्दनायाः कायोत्सर्गस्य च द्वात्रिंशद्द्वात्रिंशद्दोषा भवन्ति । तत्र वन्दनाया अनादृतं, स्तब्धं, प्रविष्टं, परपीडितं, दोलायितं, उन्मस्तकं, कच्छपरंगितं, मत्स्योद्वर्त्तनं, मनोदुष्टं, वेदिकाबंधं, भेष्यत्वं, भीषितं, ऋद्धिगौरवं, शेषगौरवं, स्तेनितं, प्रत्यनीकं, क्रोधादिशल्यं, तर्जितं, शद्धितं, हेडितं, त्रिवलितं, कुंचितं, आचार्यादिदर्शनं, अदृष्टं, संघकरमोचनं, आलब्धं, अनालब्धं, हीनं, अधिकं, घर्घरं, सुललितमिति द्वात्रिंशद्दोषा भवन्ति । व्युत्सृष्टबाहुयुगले चतुरंगुलान्तरितसमपादे सर्वाङ्गचलन-रहिते कायोत्सर्गेऽपि दोषाः स्युः । घोटकपादं, लतावक्रं, स्तंभाव-ष्टंभं, कुड्याश्रितं, मालिकोद्वहनं, शबरीगुह्यगूहनं, शृंखलितं, लंबितं, उत्तरितं, स्तनदृष्टिः, काकाऽलोकनं, खलीनितं, युगकन्धरं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कपित्थमुष्टिः, शीर्षप्रकंपितं, मूकसंज्ञा, अंगुलिचालनं, भ्रूक्षेपं, उन्मत्तं, पिशाचं, अष्टदिगवलोकनं, ग्रीवोन्नमनं, ग्रीवावनमनं, निष्ठीवनं, अंगस्पर्शनामिति द्वात्रिंशद्दोषा भवन्ति ।

क्रिया कुर्वाणो वीर्योपगूहनमकृत्वा शक्त्यनुरूपतः स्थितेनाशक्तः सन्पर्यङ्कासनेन वा त्रिकरणशुद्ध्या संपुटीकृतकरः क्रियाविज्ञापनपूर्वकं सामायिकदंडकमुच्चारयेत्, तदावर्त्तत्रयम् यथाजातं शिरोन्नमनमेकं भवति, अनेन प्रकारेण सामायिकदंडकसमाप्तावपि प्रवर्त्त्य यथोक्तकालं जिनगुणानुस्मरणसहितं कायव्युत्सर्गं कृत्वा द्वितीयदंडकस्यादावन्ते च तथैव प्रवर्त्तनं, एवमेकैकस्य कायोत्सर्गस्य द्वादशावर्त्ताश्चत्वारि शिरोवनमनानि भवन्ति । अथवैकस्मिन् प्रदक्षिणीकरणे चैत्यादीनामभिमुखीभूतस्याऽऽवर्त्तत्रयैकावनमने कृते चतसृष्वपि दिक्षु द्वादशावर्त्ताश्चतस्रः शिरावनतयो भवन्ति । आवर्त्तानां शिरःप्रणतीनामुक्तप्रमाणादाधिक्यमिति न दोषाय । उक्तं च—

दुउपादं जहाजादं वारसावत्तमेव च ।
चदुस्सिरंति सुद्धिं च किदियमं पउं वंदे ॥

वक्ष्यमाणक्रियाणां कालनियम उच्यते । दैवसिकस्य नियमस्याष्टोत्तरशतं, रात्रिकस्य तदर्द्धं, पाक्षिकस्य त्रिशतं, चातुर्मासिकस्य चतुःशतं, सांवत्सरिकस्य पंचशतं, उच्छ्वासानामेषां पंचानां नियमान्तस्य कायोत्सर्गस्य प्रमाणं । अहिंसादिपंचनियमानामन्यतमस्यातीचारे सत्येकैकस्याष्टोत्तरशतं, गोचारस्य ग्रामान्तरगमनस्याऽर्हच्छ्रमणनिषद्यानामुच्चारप्रश्रवणयोश्च पंचविंशतिः, ग्रन्थप्रारंभे परिसमाप्तौ च स्वाध्याये वन्दनायां प्रणिधाने च सप्तविंशतिः । एवमुक्तो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छ्वासप्रमाणेन कायोत्सर्गं कृत्वा अनुत्सुकः सन् किंचित्कालं धर्म्यं शुक्लं च ध्यायेत् । नामस्थापनाद्रव्यभावसंनिधानं पुण्यपापास्रवहेतुरतः चैत्यं चैत्यालयो गुरवो निषद्यास्थानादयश्च सम्यग्दृष्टीनां क्रियार्हा भवन्ति । अचेतनात्मका व्यपगतदानबुद्धयः कल्पवृक्षचिन्तामणयो यथा च देहिनां पुण्यानुरूपेणाभिलषितार्थप्रदायिनस्तथा जिनबिंबानि भव्यजनभक्त्यनुरूपेण गीर्वाणनिर्वाणपदप्रदायीनि गारुडमुद्रया यथा गरलापहरणं तथा चैत्यालोकनमात्रेणैव दुरितापहरणं भवत्यतश्चैत्यस्य तदाश्रयचैत्यालयस्याऽपि वन्दनाः कार्या ऐहिकार्थे निरपेक्षाः परानुग्रहबुद्धयोऽकारणबन्धवो मोक्षपरिभ्रष्टजनमार्गोपदेशकाः प्रत्यक्षनिस्तारकाश्च ततस्तेभ्यः सकाशात्सम्यक्त्वं ज्ञानाऽऽदानमणुव्रतं महाव्रतं संयमो तपश्च भवति ।

तेन गुरूणां पुण्यपुरुषोषितनिरवद्यनिषद्यास्थानादीनामुच्यते क्रियाविधानं । परायत्तस्य सतः क्रियां कुर्वाणस्य कर्मक्षयो न घटते, तस्मादात्माधीनः सञ्चैत्यादीन् प्रतिवन्दनार्थं गत्वा धौतपादस्त्रिप्रदक्षिणीकृत्येर्यापथकायोत्सर्गं कृत्वा प्रथममुपविश्याऽऽलोच्य चैत्यभक्तिकायोत्सर्गं करोमीति विज्ञाप्योत्थाय जिनेन्द्रचन्द्रदर्शनमात्रान्निजनयनचन्द्रकान्तोपलविगलदानन्दाश्रुजलधारापूरपरिप्लावितपक्ष्मपुटोऽनादिभवदुर्लभभगवदर्हत्परमेश्वरपरमभट्टारकप्रतिबिंबदर्शनजनितहर्षोत्कर्षपुलकिततनुरतिभक्तिभरावनतमस्तकन्यस्तहस्तकुशेशयकुड्मलो दंडकद्वयस्यादावन्ते च प्राक्तनक्रमेण प्रवृत्त्य चैत्यस्तवनेन त्रिःपरीत्य द्वितीयवारेऽप्युपविश्याऽऽलोच्य पंचगुरुभक्तिकायोत्सर्गं करोमीति विज्ञाप्योत्थाय पंच परमेष्ठिनः स्तुत्वा तृतीयवारेऽप्युपवि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्याऽऽलोचनीयः। एवमात्माधीनता, प्रदक्षिणीकरणं, त्रिवारं, निषण्णत्रयं, चतुःशिरो, द्वादशावर्त्तकमिति क्रियाकर्म षड्विधं भवति। तत्र चतुःशिरो दंडकद्वयाद्यन्ते प्रणतौ प्रदक्षिणीकरणे च दिक्चतुष्टयावनतौ चतुःशिरो भवति, अथवा शिरः शब्दः प्रधानवाची वन्दनाप्रधानभूता अर्हत्सिद्धसाधुधर्मा इति। उक्तं च राद्धान्तसूत्रे। " आदाहीणं पदाहीणं तिखुत्तं तिऊणदं चदुस्सिरं वारसावत्तं चेति।" एवं देवतास्तवनक्रियायां चैत्यभक्तिं पंचगुरुभक्तिं च कुर्यात्।

चतुर्दशीदिने तयोर्मध्ये सिद्धश्रुतशांतिभक्तिर्भवति। अष्टम्यां सिद्धश्रुतचारित्रशान्तिभक्तयः। पाक्षिके सिद्धचारित्रशान्तिभक्तयः। सिद्धप्रतिमायाः सिद्धभक्तिरेव, जिनप्रतिमायास्तीर्थकरजन्मनश्च पाक्षिकी क्रिया, अष्टम्यादिक्रियासु दर्शनपूजा त्रिकालवन्दनायोगे शान्तिभक्तितः प्राक् चैत्यभक्तिं पंचगुरुभक्तिं च कुर्यात्। चतुर्दशीदिने धर्मव्यासंगादिना क्रियां कर्तुं न लभेत चेत्पाक्षिकेऽष्टम्याः क्रियाः कर्त्तव्याः नन्दीश्वरदिने सिद्धनन्दीश्वरपंचगुरुशान्तिभक्तयोऽभिषेकवन्दनायाः सिद्धचैत्यपंचगुरुशान्तिभक्तयः। स्थिरचलजिनप्रतिमाप्रतिष्ठायाः सिद्धशान्तिभक्ती भवतः। स्थिरप्रतिमायाश्चतुर्थस्थाने सिद्धभक्तिरालोचनासहिता चारित्रभक्तिश्चैत्यपंचगुरुशान्तिभक्तयश्च कार्या। चलप्रतिमाया अभिषेकवन्दना स्यात्। महत्तरस्य सामान्यर्षेः सिद्धभक्तिपूर्विका वंदना। सिद्धान्तविदां सिद्धश्रुतभक्ती भवतः। आचार्याणां सिद्धाचार्यभक्ती। सिद्धान्तवेदिनामाचार्याणां सिद्धश्रुतसूरिभक्तयः। प्रतिमायोगास्थितस्य मुनेर्लघीयसोऽपि सिद्ध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगशान्तिभक्तयः । निष्क्रमणे सिद्धचारित्रयोगशांतिभक्तयो भवन्ति प्रदक्षिणीकरणं योगभक्त्या । ज्ञानोत्पत्तौ सिद्धश्रुतचरणयोगशान्तिभक्तयो योगभक्त्या प्रदक्षिणीकरणं । जिननिर्वाणक्षेत्रे सिद्धश्रुतचारित्रयोगपरिनिर्वाणशान्तिभक्तयो निर्वाणभक्त्या प्रदक्षिणीकरणं । श्रीवर्द्धमानजिननिर्वाणदिने सिद्धनिर्वाणपंचगुरुशान्तिभक्तयः निर्वाणभक्त्या प्रदक्षिणा । सामान्यर्षौ मृते शरीरस्य निषद्यकास्थानस्य वा सिद्धयोगशान्तिभक्तयः । सिद्धान्तवेदिनां साधूनां सिद्धश्रुतयोगशान्तिभक्तयः । उत्तरयोगिनां सिद्धचारित्रयोगशान्तिभक्तयः । सैद्धान्तोत्तरयोगिनां सिद्धचारित्रयोगशान्तिभक्तयः । आचार्यस्य सिद्धयोगाचार्यशान्तिभक्तयः । सैद्धान्ताचार्यस्य सिद्धश्रुतायोगाचार्यशान्तिभक्तयः । उत्तरयोगिनामाचार्याणां सिद्धचारित्रयोगाचार्यशान्तिभक्तयः । उत्तरयोगिनः सैद्धान्ताचार्यस्य सिद्धश्रुतयोगाचार्यशान्तिभक्तयः । अनंतरोक्ता अष्टौ क्रियाः शरीरस्य निषद्यास्थानस्य च । श्रुतपंचम्यां सिद्धश्रुतभक्तिपूर्विकां वाचनां गृहीत्वा तदनु स्वाध्यायं गृह्णतः श्रुतभक्तिमाचार्यभक्तिं च कृत्वा गृहीतस्वाध्यायाः कृतश्रुतभक्तयः स्वाध्यायं निष्ठाप्य समाप्तौ शान्तिभक्तिं कुर्युः । संन्यासप्रारंभे सिद्धश्रुतभक्ती कृत्वा गृहीतवाचनाः कृतश्रुतसूरिभक्तयः । स्वाध्यायं गृहीत्वा श्रुतभक्तौ स्वाध्यायं निष्ठापयेयुः । वाचनानिष्ठापनेऽपीमां क्रियां कृत्वा समाप्तौ शान्तिभक्तिं कुर्वन्तु । संन्यासस्थितस्य स्वाध्यायग्रहणे महाश्रुतसूरिभक्ती कृत्वा गृहीतस्वाध्याया महाश्रुतभक्तौ निष्ठापयन्तु । दैवसिकरात्रिगोचारीप्रतिक्रमणे सिद्ध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिक्रमणानिष्ठितकरणचतुर्विंशातितीर्थंकरभक्तीर्नियमेन कुर्यात् । योगग्रहणे मोक्षे च योगभक्तिः । पाक्षिकचातुर्मासिकसांवत्सरिकप्रतिक्रमणे सिद्धचारित्रप्रतिक्रमणानिष्ठितकरणचतुर्विंशातितीर्थकरभक्तिचारित्रालोचनागुरुभक्तय बृहदालोचना गुरुभक्तिर्लघीयसी आचार्यभक्तिश्च करणीया । शेषप्रतिक्रमणे चारित्रालोचनाबृहदालोचनागुरुभक्तिं विना शेषाः कर्तव्याः । दीक्षाग्रहणे लुंचने च सिद्धयोगभक्ती कृत्वा लुंचनावसाने सिद्धभक्तिः करणीया । सिद्धयोगभक्ती कृत्वा प्रत्याख्यानं गृहीत्वाऽऽचार्यभक्तिं कृत्वाचार्यान्वन्दतां सिद्धभक्तिं कृत्वा प्रत्याख्यानं मोचयेत् । श्रुतभक्तिमाचार्यभक्तिं च कृत्वा गृहीतस्वाध्यायस्तन्निष्ठापने श्रुतभक्तिं करोतु । मङ्गलगोचरमध्याह्ने सिद्धचैत्यपंचगुरुशान्तिभक्तिं कुर्यात् । मंगलगोचरप्रत्याख्यानो महासिद्धयोगभक्ती कृत्वा गृहीतप्रत्याख्यान आचार्यशान्तिभक्ती कुर्यात् । वर्षाकाले योगग्रहणे निष्ठापने च सिद्धयोगपंचचैत्यगुरुभक्तयः कार्याः, चैत्यभक्त्या प्रदक्षिणीकुर्वन् सालोचनव्युत्सर्गं चतसृषु दिक्षु कुर्यात् । सिद्धान्तवाचनाग्रहणे सिद्धश्रुतभक्ती कृत्वा तदनुश्रुताचार्यभक्तिं कृत्वा गृहीतस्वाध्यायस्तन्निष्ठापने श्रुतशान्तिभक्ती करोतु । सिद्धान्तस्यार्थाधिकाराणां समाप्तावेकैकं कायोत्सर्गं कुर्यात् । अर्थाधिकाराणां सुबहुमान्यत्वात्तेषामादौ सिद्धश्रुतसूरिभक्ती कृत्वा समाप्तावप्येतेन क्रमेण प्रवर्त्तिते सति षट् कायोत्सर्गा भवन्ति । गुरूणामनुज्ञया ज्ञानविज्ञानवैराग्यसम्पन्नो विनीतो धर्मशीलः स्थिरश्च भूत्वाऽऽचार्यपदव्या योग्यः साधुर्गुरुसमक्षे सिद्धाचार्यभक्तिं कृत्वाऽऽचार्यपदवीं गृहीत्वा शान्तिभक्तिं कुर्यात् । एव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुक्ताः क्रिया यथायोग्यं जघन्यमध्यमोत्तमश्रावकैः संयतैश्च करणीयाः । किमर्थो व्युत्सर्गो निःसंगत्वं निर्भयत्वं जीविताशाव्युदासो दोषच्छेदो मोक्षमार्गभावनापरत्वमित्येवमाद्यर्थम् ।

अथ ध्यानप्रस्तावः । एकाग्रचिंतानिरोधो ध्यानं, एकस्मिन् क्रियासाधनेऽग्रं मुखं यस्याश्चिन्ताया इत्येकाग्रचिन्ता तस्या निरोधोऽन्यत्राऽसंचारस्तदेकाग्रचिन्तानिरोधो ध्यानं । तस्य योगश्चतुर्विधः; ध्यानं, ध्येयं, ध्याता, फलमिति । तत्र ध्यानं चिन्ताप्रबन्धलक्षणं । ध्येयमप्रशस्तप्रशस्तपरिणामकारणं । ध्याता कषायकलुषितो गुप्तेन्द्रियश्च । फलं संसारभ्रमणं स्वर्गापवर्गसुखं च । तदेतच्चतुरंगध्यानमप्रशस्तप्रशस्तभेदेन द्विविधं, श्रेयोऽधिकारेऽप्रशस्तोपन्यासः परिज्ञातस्य प्रहेयत्वोपपत्तेः । अप्रशस्तं द्विविधमार्त्तं रौद्रं चेति । तत्राऽऽर्त्तं बाह्याऽऽध्यात्मिकभेदाद्द्विविकल्पं । तत्र परानुमेयं बाह्यं शोचनक्रन्दनविलपनपरिदेवनविषयसंगपरिभवविस्मयादिलक्षणं । स्वसंवेद्यमाध्यात्मिकार्त्तध्यान, अमनोज्ञविप्रयोगस्यानुत्पत्तिसंकल्पाध्यवसानं, उत्पन्नस्य च विनाशसंकल्पाध्यवसानमिति चतुःप्रकारं । तद्यथा— अमनोज्ञं दुःखसाधनं, तच्च बाह्यमाध्यात्मिकमिति द्विविधं । तत्र बाह्यं चेतनकृतमचेतनकृतमिति द्विप्रकारं । तत्र चेतनकृतं देवमनुष्यतिर्यक्संपादितमसातं; अचेतनकृतं च विषकंटकाग्निशस्त्रक्षारशीतोष्णादिजनितदुःखं । आध्यात्मिककारणं शारीरं मानसमिति द्विविधं । तत्र शारीरं वातपित्तश्लेष्मवैषम्यसमुद्भवशिरोऽक्षिदन्तकुक्षिशूलादिजनितं । मानसं चाऽरतिभयशोकभयजुगुप्साविषाददौर्मनस्यादिजनितमित्यादिदुःखसाधनममनोज्ञं, तेन संप्रयोगः स कथं नाम

मे नोत्पद्यत इति चिन्ताप्रबन्धः, संकल्पस्तस्याध्यवसानं तीव्रकषायानुरंजनं, एतदमनोज्ञसंप्रयोगस्यानुत्पत्तिसङ्कल्पाध्यवसानं प्रथमार्त्तं । एतद्दुःखसाधनसद्भावे तस्य विनाशकांक्षोत्पन्नविनाशसंकल्पाध्यवसानं द्वितीयार्त्तं । मनोज्ञं नाम धनधान्यहिरण्यसुवर्णवस्तुवाहनशयनाऽऽसनस्रक्चन्दनवनितादिसुखसाधनं मे स्यादिति गर्द्धनं । मनोज्ञविप्रयोगस्योत्पत्तिसंकल्पाध्यवसानं तृतीयार्त्तं । सुखसाधनसद्भावे तेन विप्रयोगो मे न स्यादिति संकल्पः उत्पन्नविनाशसंकल्पाध्यवसानं चतुर्थार्त्तं । एतच्चतुर्विधार्त्तध्यानं कृष्णानीलकापोतलेश्याबलाधानं प्रमादाधिष्ठानं । प्रागप्रमत्ताच्छङ्गुणस्थानभूमिकमन्तर्मुहूर्तकालमतः परं दुर्धरत्वात् क्षायोपाशमिकभावपरोक्षज्ञानत्वात्तिर्यग्गतिफलसंवर्त्तनीयमिति ।

रौद्रं च बाह्याऽऽध्यात्मिकभेदेन द्विविधं । तत्र परानुमेयं बाह्यं परुषनिष्ठुराऽऽक्रोशननिर्भर्त्सनबन्धनतर्जनताडनपीडनपरदारातिक्रमणादिलक्षणं । स्वसंवेद्यमाध्यात्मिकं तच्च हिंसानंदमृषानन्दस्तेयानन्दविषयसंरक्षणानन्दभेदाच्चतुर्विधं । तीव्रकषायानुरंजनं हिंसानन्दं प्रथमरौद्रं । स्वबुद्धिविकल्पितयुक्तिभिः परेषां श्रद्धेयरूपाभिः परवंचनं प्रतिमृषाकथने संकल्पाध्यवसानं मृषानन्दं द्वितीयरौद्रं । हठात्कारेण प्रमादप्रतीक्षया वा परस्वापहरणं प्रति संकल्पाध्यवसानं तृतीयं रौद्रं । चेतनाचेतनलक्षणे स्वपरिग्रहे ममैवेदं स्वमहमेवास्य स्वामीत्यभिनिवेशात्तदपहारकव्यापादनेन संरक्षणं प्रति संकल्पाध्यवसानं संरक्षणानन्दं चतुर्थं रौद्रं । चतुष्टयमपीदमिति कृष्णनीलकापोतले-

१ स्वं धनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्याबलाधानं प्रमादाधिष्ठानं । प्राक्प्रमत्तात्पंचगुणस्थानभूमिकमन्तर्मुहूर्त्तकालमतःपरं दुर्धरत्वात् क्षायोपशमिकभावं परोक्षज्ञानत्वादौदयिकभावं वा भावलेश्याकषायप्राधान्यान्नरकगतिफलसंवर्तनीयामिति ।

उभयमप्येतदपध्यानं परिहरन्नपवर्गकामो भिक्षुः परीषहबाधासहिष्णुः शक्तिमदुत्तमसंहननान्वितः प्रशस्तध्यानप्रवणो गिरिगुहादरीकन्दरतरुकोटरसरित्पुलिनपितृवनजीर्णोद्यानशून्यगृहादीनामन्यतमस्मिन् प्रदेशे व्यालपशुमृगषण्ढकमनुष्यादीनामगोचरे तत्रत्यागंतुकजन्तुभिः परिवर्जितेऽत्युष्णातिशीतातिवातातिवर्षातपरहिते समन्तादिन्द्रियमनोविक्षेपहेतुनिराकरणभूते शुचावनुकूलस्पर्शिनि भूमितले यथासुखमुपविष्टो बद्धपर्यङ्कासनः स्वाङ्के वामपाणितलस्योपरि दक्षिणपाणितलमुत्तानं निधाय नेत्रे नात्युन्मीलयन्नातिमीलयन् दन्तैर्दन्ताग्राणि संदधानः प्राणापानप्रचारात्यंतनिग्रहे तीव्रदुःखाकुलचेतस एकाकारपरिणामो न जायते, ततो मन्दमन्दप्राणापानप्रचारः स्यादेवं द्रव्यक्षेत्रकालभावशुद्धिसंयुतस्तत्प्रतिपक्षदोषवर्जितः परमयोगी संसारलतामूलोच्छेदनहेतुभूतं प्रशस्तध्यानं ध्यायेत् ।

तद् द्विविधं; धर्म्यं शुक्लं चेति । तत्र धर्म्यध्यानं बाह्याध्यात्मिकभेदेन द्विप्रकारं । तत्र परानुमेयं बाह्यं सूत्रार्थगवेषणं दृढव्रतशीलगुणानुरागनिभृतकरचरणवदनकायपरिस्पंदवाग्व्यापारं जृंभजृंभोद्गाररक्षवथुप्राणापानोद्रेकादिविरमणलक्षणं भवति । स्वसंवेद्यमाध्यात्मिकं, तद्दशविधं; अपायविचयं, उपायविचयं, जीवविचयं, अजीवविचयं, विपाकविचयं, विरागविचयं, भवविचयं, संस्थनाविचयं, आज्ञाविचयं, हेतुविचयं, चेति । एतद्दशविधमपि दृष्टश्रुतानुभूतदो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षपरिवर्जनपरस्य मन्दतरकषायानुरंजितस्य भव्यवरपुंडरीकस्य भवति। तत्रापायविचयं नामानाद्याजवंजवे यथेष्टचारिणो जीवस्य मनोवाक्कायप्रवृत्तिविशेषोपार्जितपापानां परिवर्जनं तत्कथं नाम मे स्यादिति संकल्पश्चिंताप्रबन्ध प्रथमधर्म्यं। उपायविचयं प्रशस्तमनोवाक्कायप्रवृत्तिविशेषोऽवश्यः कथं मे स्यादिति संकल्पो द्वितीयधर्म्यम्। जीवविचयं जीव उपयोगलक्षणो द्रव्यार्थादनाद्यनन्तोऽसंख्येयप्रदेशः स्वकृतशुभाशुभकर्मफलोपभोगी गुणवानात्मोपात्तदेहमात्रः प्रदेशसंहरणविसर्पणधर्मा सूक्ष्मोऽव्याघात उर्द्ध्वगतिस्वभावोऽनादिकर्मबन्धनबद्धस्तत्क्षयान्मोक्षभागी गत्यादि-नामादि-निर्देशादि-सदादि-प्रमाणनयनिक्षेपविषय इत्यादिजीवस्वभावानुचिन्तनं तृतीयं धर्म्यं। विपाकविचयमष्टविधकर्माणि नामस्थापनाद्रव्यभावलक्षणानि मूलोत्तरोत्तरप्रकृतिविकल्पविस्तृतानि गुडखंडसिताऽमृतमधुरविपाकानि निंबकांजीविषहालाहलकटुकविपाकानि चतुर्विधबंधानि लतादार्वस्थिशैलस्वभावानि कासु कासु गतिषु योनिष्ववस्थासु च जीवानां विषया भवन्तीति विपाकविशेषानुचिन्तनं पंचमधर्म्यं, विरागविचयं शरीरमिदमनित्यमपरित्राणं विनश्वरस्वभावमशुचिदोषाधिष्ठितं सप्तधातुमयं बहुमलपूर्णमनवरतनिस्यंदितस्रोतोबिलमतिबीभत्समाधेयमशौचमपि पूतिगंधि सम्यग्ज्ञानिजनवैराग्यहेतुभूतं नास्त्यत्र किंचित्कमनीयमिन्द्रियसुखानि प्रमुखरसिकानि क्रियावसानविरसानि किंपाकपाकविपाकानि पराधीनान्यस्थानप्रचुरभंगुराणि यावद्यावदेषां रामणीयकं तावत्तावद्भोगिनां तृष्णाप्रसंगोऽनवस्थो यथाऽग्नेरिन्धनैर्जलनिधेः सरित्सहस्रेण न तृप्तिस्तथा लोकस्याप्येतर्न तृप्तिरुपशान्तिश्चैहिका-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुत्रिकाविनिपातहेतवस्तानि देहिनः सुखानीति मन्यन्ते महादुःखकारणान्यनात्मीयत्वादिष्टान्यप्यनिष्टानीति वैराग्यकारणविशेषानुचिन्तनं षष्ठं धर्म्यं। भवविचयं सचित्ताचित्तमिश्रशीतोष्णमिश्रसंवृतविवृतामिश्रभेदासु योनिषु जरायुजाण्डजपोतोपपादसम्मूर्च्छनजन्मनो जीवस्य भवाद्भवान्तरसंक्रमण इषुगतिपाणिमुक्तालांगलिकागोमूत्रिकाश्चतस्रो गतयो भवन्ति। तत्रेषुगतिरविग्रहैकसामयिकी ऋज्वी संसारिणां सिद्ध्यतां च जीवानां भवति। पाणिमुक्तैकविग्रहा द्विसामयिकी संसारिणां भवति। लांगालिका द्विविग्रहा त्रिसामयिकी। गोमूत्रिका त्रिविग्रहा चतुःसामयिकी भवति। एवमनादिसंसारे संधावतो जीवस्य गुणविशेषानुपलब्धितस्तस्य भवसंक्रमणं निरर्थकमित्येवमादिभवसंक्रमणदोषानुचिंतनं सप्तमं धर्म्यं। यथावस्थितमीमांसासंस्थानविचयं तद्द्वादशविधं, अनित्यत्वमशरणत्वं संसार एकत्वमन्यत्वमशुचित्वमास्रवः संवरो निर्जरा लोको बोधिदुर्लभो धर्मस्वाख्यातं इत्यनुपेक्षा। उक्तं हि।

समुदेति विलयमृच्छति भावो नियमेन पर्ययनयस्य।
नोदेति नो विनश्यति भवनतया लिंगितो नित्यम्॥

तत्रानित्यत्वमात्मना रागादिपरिणामात्मना कर्मणो कर्मभावेन गृहीतानि पुद्गलद्रव्याण्यगृहीतानि परमाण्वादीनि तेषां सर्वेषां द्रव्यात्मना नित्यत्वं, पर्यायात्मना सततमनुपरतभेदसंसर्गवृत्तित्वादनित्यत्वमिमानि हि शरीरेन्द्रियविषयोपभोगपरिभोगद्रव्याणि समुदायरूपाणि जलबुद्बुदवदनवस्थितस्वभावानि गर्भादिष्ववस्थाविशेषेषु सदोपलभ्यमानसंयोगविपर्ययाणि मोहोदयादत्राऽज्ञानी नित्यतां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्यते, न किंचित्संसारे ध्रुवमस्त्यात्मनो ज्ञानदर्शनोपयोगस्वभावादन्यदिति चिन्तनमनित्यत्वानुप्रेक्षा, एवमस्य चिन्तयतस्तेष्वभिष्वंगाभावाद्भुक्तोज्झितगन्धमाल्यादिष्विव वियोगकालेऽपि विनिपातो नोत्पद्यते ।

अशरणत्वं शरणं द्विविधं; लौकिकं, लोकोत्तरं चेति । प्रत्येकं त्रिविधं जीवाजीवमिश्रकभेदात् । तत्र लौकिकं जीवशरणं राजा देवता, प्राकाराद्यऽजीवशरणं प्राकारान्वितं, ग्रामनगरादि मिश्रकं । लोकोत्तरंजीवशरणं पंच गुरवस्तत्प्रातिबिंबाद्यऽजीवशरणं सधर्मसाधुवर्गोपकरणं मिश्रकशरणं । यथा मृगशावकस्यैकान्ते वलवता क्षुधितेनामिषैषिणा व्याघ्रेणाभिद्रुतस्य न किंचिच्छरणमस्ति तथा जन्मजराव्याधिप्रियवियोगाप्रियसंयोगेप्सिताऽलाभदारिद्र्यदौर्मनस्यादिसमुत्थितेन दुःखेनाभिभूतस्य जन्तोः शरणं न विद्यते । परिपुष्टमपि शरीरं भोजनं प्रति सहायी भवति न व्यसनोपनिपाते सति । यत्नेन संचिता अप्यर्था न भवान्तरमनुगच्छन्ति । संविभक्तसुखदुःखाः सुहृदोऽपि न मरणकाले परित्रायन्ते बन्धवः समुदिताश्च रुजा परीतं न परिपान्ति । अस्ति चेत्सुचरितो धर्मो व्यसनमहार्णवे तरणोपायो भवति । मृत्युना नीयमानस्य सहस्रनयनादयोऽपि न शरणं तस्माद्भवव्यसनसंकटे धर्म एव शरणं सुहृदर्थोऽप्यननुयायी नान्यत्किंचिच्छरणमिति भावनमशरणानुप्रेक्षा । एवमस्य भावयतो नित्यमशरणोऽस्मीति भृशमुद्विग्नस्य सांसारिकेषु भावेषु ममत्वविगमो भवति, भगवदर्हत्सर्वज्ञप्रणीतागम एव प्रतिपन्नो भवेत् ।

संसारश्च, संसारोऽसंसारो नो-संसारस्त्रितयव्यपायश्चेति चतुर्विधावस्था । तत्र संसारश्चतसृषु गतिषु नानायोनिविकल्पासु परिभ्रमणं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिवपदपरमामृतसुखप्रतिष्ठाऽसंसारः, सयोगकेवलिनश्चतुर्गतिभ्रमणाभावात्संसारान्तःप्राप्त्यभावाच्चेषत्संसारो नो-संसार इति,तत्रितयव्यपायोऽयोगिकेवलिनो भवभ्रमणाभावात् सयोगिकेवलिवत्प्रदेशपरिस्पन्दविगमात्संसारान्तावाप्त्यभावाच्च देहपरिस्पन्दाऽभावेऽपि देहिनः सततं प्रदेशचलनमस्ति, ततः सदा संसार एव सिद्धानामयोगिकेवलिनां च नास्ति प्रदेशचलनं तद्योग्यकर्मसामग्र्यभावादितरेषां त्रिधाऽवसीयते ।स पुनः संसारः, अभव्यापेक्षयाऽनाद्यनिधनः, भव्यसामान्यार्पणयाऽनादिरुच्छेदवान्, भव्यविशेषविवक्षया क्वचित्सादिः सनिधनः । असंसारः सादिरनिधनः । तत्रितयव्यपायोऽन्तमुहूर्तकालः । नो-संसारो जघन्येनान्तर्मुहूर्तः । उत्कृष्टेन देशोनपूर्वकोटिलक्षः । सादिः सपर्यवसानः संसारो जघन्येनाऽन्तर्मुहूर्त्तः । उत्कृष्टेनार्द्धपुद्गलपरावर्त्तनकालः । स च संसारो द्रव्यक्षेत्रकालभवभावभेदात्पंचविधो, द्रव्यनिमित्तः संसारो द्विविधः कर्म-नोकर्मविवक्षाभेदात्कर्मद्रव्यसंसारो ज्ञानावरणादिविषयो नोकर्मद्रव्यसंसार औदारिकवैक्रियकाऽऽहारक[१]तैजसशरीराणामाहारशरीरेन्द्रियाऽऽनपानभाषामनःपर्याप्तीनां विषयः । क्षेत्रहेतुकः संसारो द्विविधः, स्वक्षेत्रपरक्षेत्रविकल्पात् । लोकाकाशतुल्यप्रदेशस्यात्मनः कर्मोदयवशात्संहरणविसर्पणधर्मिणो हीनाधिकाकाशप्रदेशपरिमाणावगाहत्वं स्वक्षेत्रसंसारः । सम्मूर्च्छनगर्भोपपादजन्मनवयोनिविकल्पाद्यवलंबनः परक्षेत्रसंसारः । परमार्थव्यवहारभेदेन कालो द्विविधः ।तत्र यावंतो लोकाकाशप्रदेशास्तावंतः कालाणवः परस्परं प्रत्यबंधा एकैकस्मिन्नाकाशप्रदेशे एकैकवृत्त्या लोकव्यापिनो मुख्योपचारप्रदेशक-

१ "क" पुस्तके "तैजस" इति पाठो नाऽस्ति ।

ल्पना, भावान्निरवयवाः, मुख्यप्रदेशकल्पना हि धर्माधर्मजीवाकाशेषु पुद्गलेषु च द्व्यणुकादिस्कन्धेषु परमाणुषूपचारप्रदेशकल्पना प्रचयशक्तियोगात् । विनाशहेत्वभावान्नित्याः, विविधपरिणामिषट्द्रव्यपर्यायपरिवर्त्तनहेतुत्वादनित्याः, रूपरसगन्धस्पर्शयोगाभावादमूर्त्ताः, जीवप्रदेशवत्प्रदेशान्तरसंक्रमणाऽभावान्निष्क्रिया इति परमार्थकालः । व्यवहारकालः परमार्थकालवर्तनया लब्धकालव्यपदेशः परिणामादिलक्षणः । कुतश्चित्परिच्छिन्नोऽपरिच्छिन्नस्य परिच्छेदहेतुः । भूतो वर्तमानो भविष्यन्निति त्रिविधः कालः परस्परापेक्षत्वात्, यथा वृक्षपंक्तिमनुसरतो देवदत्तस्यैकैकं तरुं प्रति प्राप्तप्राप्नुवत्प्राप्स्यद्व्यपदेशस्तथा तात्कालाणूननुसरतां द्रव्याणां क्रमेण वर्त्तनापर्यायमनुभवतां भूतवर्तमानभविष्यद्व्यवहारसद्भावः । तत्र परमार्थकाले भूतादिव्यवहारो गौणो व्यवहारकाले तु मुख्यः । किमत्र बहुनोक्तेन परमार्थकालेन कारणभूतेन तेन षट् द्रव्याणि परावर्त्यन्ते कार्यरूपाणि । तेषां द्रव्याणां परिच्छेदकाः समयावलिकादयः । द्रव्यस्यैकपर्याय एकसमयो द्वित्रिचतुःसंख्येयासंख्येयानन्तपर्यायकलापाः । द्वित्रिचतुःसंख्येया असंख्येया अनन्तसमया यथा प्रदीपः स्वपरप्रकाशकस्तथैव कालः स्वपरप्रवर्त्तकः, अथवा सर्वजघन्यगतिपरिणतस्य परमाणोः स्वावगाढाकाशप्रदेशव्यतिक्रमणं कालः परमनिरुद्धो निर्विभागः समय इति कालसंसारः ।

भवनिमित्तसंसारो द्वात्रिंशद्विधः पृथिव्यप्तेजोवायुकायिकाः प्रत्येकं चतुर्विधाः सूक्ष्मबादरपर्याप्तापर्याप्तभेदात् । वनस्पतिकायिका द्वेधा प्रत्येकशरीराः साधारणशरीराश्चेति । प्रत्येकशरीरा द्वेधा पर्याप्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कापर्याप्तकभेदात् । साधारणशरीरा आहारशरीरेन्द्रियोच्छ्वासनिः-श्वासपर्याप्त्युत्पादननिमित्तमाहारवर्गणायाः गृहीतपुद्गलपिंडास्तत्र यत्रैको म्रियते जीवस्तत्र मरणमनंतानां यत्रैकश्चोत्पद्यते तत्राऽनंता-नामुत्पत्तिर्भवति तेषां लिंगं गूढशिरादि । उक्तं च—

साहारणमाहारो साहारणमाणपाणगहणं च ।
साहारणजीवाणं साहारणलक्खणं भणियं ॥ १ ॥

जत्थेक्कु मरइ जीवो तत्थ दु मरणं भवे अणंताणं ।
चंकमइ जत्थ एक्को चंकमणं तत्थ णंताणं ॥ २ ॥

गूढसिरसंधिपव्वं समभंगमहीरुहं च छिण्णरुहं ।
साहारणं सरीरं तव्विवरीयं च पत्तेयं ॥ ३ ॥

मूले कंदे छल्ली पवालसालदलकुसुमफलबीजे ।
समभंगे सदिणंता असमे सादि होंति पत्तेया ॥ ४ ॥

कंदस्स व मूलस्स व सखाखंधस्स चावि बहलतरी ।
छल्ली साणंतजिया पत्तेयजिया दु तणुकदरी ॥ ५ ॥

ते च साधारणशरीराश्चतुर्धा सूक्ष्मबादरपर्याप्तकापर्याप्तकविक-ल्पात् । द्वित्रिचतुरिन्द्रियाः प्रत्येकं द्वेधा, पर्याप्तकापर्याप्तकविकल्पात् । पंचेन्द्रियाश्चतुर्धा संज्ञ्यसंज्ञिपर्याप्तकापर्याप्तकापेक्षयेति ।

भावनिमित्तसंसारो द्वेधा स्वभावपरभावाश्रयात् । स्वभावो मिथ्या-दर्शनकषायादिः, परभावो ज्ञानावरणादिकर्मरसादिः । एवमेतस्मिन्न-नेकयोनिकुलकोटिबहुशतसहस्रसंकटे संसारे परिभ्रमन्नयं जीवः कर्म-यंत्रप्रेरितः पिता भूत्वा भ्राता पुत्रः पौत्रश्च भवति । माता भूत्वा भगिनी भार्या दुहिता च भवति । किं बहुना स्वयमात्मनः पुत्रो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवतीत्येवमादिसंसारे स्वभावचिन्तनं संसारानुप्रेक्षा। एवमस्य भावयतः संसारदुःखभयादुद्विग्नस्य ततो निर्वेदो भवति निर्विण्णश्च संसारप्रहाणाय प्रतियतते।

अथैकत्वानुप्रेक्षावर्णनं। जन्मजरामरणाऽऽवृत्तिमहादुःखानुभवनं प्रति सहायानपेक्षत्वमेकत्वं। एकत्वमनेकत्वमेतदुभयं द्रव्यक्षेत्रकालभावविकल्पं। तत्र द्रव्यैकत्वं जीवादिष्वन्यतमद्रव्यविषयत्वेनाऽभेदत्वं। क्षेत्रैकत्वं परमाण्ववगाढप्रदेशः। कालैकत्वमभेदसमयः। भावैकत्वं मोक्षमार्गः। तथाऽनेकत्वमपि भेदविषयं, न हि किंचिदेकमेव निश्चितमस्ति अनेकमेव वा एकमपि सामान्यार्पणया विशेषार्पणयाऽनेकमपि भवति। तत्र परिप्राप्तबाह्याभ्यंतरोपधित्यागस्य सम्यग्ज्ञानादेकत्वनिश्चयमास्कन्दतः यथाख्यातचारित्रैकवृत्तेर्मोक्षमार्गभावेनैकत्वं तत्प्राप्तय--एक एवाऽहं न कश्चिन्मे स्वः परो वा विद्यते; एक एव जायत एक एव म्रियते; न मे कश्चिज्जनः परजनो वा व्याधिजरामरणादीनि दुःखान्यपहरति; बंधुमित्राणि श्मशानं नाऽतिवर्तन्ते; धर्म एव मे सहायः सदाऽनपायीति चिन्तनमेकत्वाऽनुप्रेक्षा। एवमस्य भावयतः स्वजनेषु प्रीत्यनुबंधो न भवति, परजनेषु द्वेषानुबंधो नोपजायते, [1]ततो निःसंगताऽभ्युपजायते, ततो निःसंगतो मोक्षोऽवघटते। इत्येकत्वानुप्रेक्षा।

अथाऽन्यत्वाऽनुप्रेक्षाप्रकरणम्। अन्यत्वं चतुर्धा व्यवतिष्ठते, नामस्थापनाद्रव्यभावाऽऽलंबनभेदात्। आत्मा जीव इति नामभेदः।

१ इति पाठः ,'क' पुस्तके नाऽस्ति।

काष्ठप्रतिमेति स्थापनाभेदः । जीवद्रव्यमजीवद्रव्यमिति द्रव्यभेदः । एकस्मिन्नपि द्रव्ये बालो युवा मनुष्यो देव इत्यादि भावभेदः जीवकर्मणो बंधं प्रत्येकत्वे सत्यपि लक्षणबंधादन्यत्वं, जीवस्तावज्ज्ञानदर्शनोपयोगलक्षणः । वर्णगंधरसस्पर्शवन्तः पुद्गला इति लक्षणकृतो भेदः । प्रतिसमयमनंतानंताः कर्माणवो योगवशादागत्य जीवप्रदेशेष्वन्योन्यप्रदेशाऽनुप्रविष्टाः सन्तः कषायवशादवतिष्ठन्ते समयं प्रत्यनंतानंताः कर्मपुद्गला जीवं परित्यज्य प्रच्यवंत इति बंधं प्रति भेदः । नो कर्मपुद्गला अपि बन्धनगुणेन जीवे क्षीरनीरन्यायेनैकबन्धनबद्धा भूत्वा प्रतिक्षणं निर्जीर्यन्ते जीवः स्वयं कर्मवशात्तत्प्रायोग्यशरीरं निर्माय शरीरस्थोऽपि यथा नखरोमदन्तास्थिषु न विद्यते तथा रुधिरवसाशुक्ररसश्लेष्मपित्तमूत्रपुरीषमस्तिष्कादिषु प्रदेशेष्वपि नास्ति एवं कर्मशरीरावयवेभ्यो जीवस्याऽन्यत्वं ततः कुशलपुरुषप्रयोगसान्निधौ शरीरादत्यंतव्यतिरेकेणाऽऽत्मनो ज्ञानादिभिरनंतैरहेयैर्मुक्तावस्थानं तदवाप्य—ऐन्द्रियकं शरीरमतीन्द्रियोऽहं, अज्ञं शरीरं ज्ञस्वभावोऽहं, अनित्यं शरीरं नित्योऽहं, आद्यन्तवच्छरीरमनाद्यनन्तोऽहं, बहूनि मे शरीरशतसहस्राण्यतीतानि संसारे परिभ्रमतः स एवाऽहमन्यस्तेभ्य इति शरीरादन्यत्वं मे । किमङ्ग² पुनर्बाह्येभ्यः परिग्रहेभ्य इति चिन्तनमन्यत्वानुप्रेक्षा । एवमस्य मनः समादधानस्य शरीरादिषु स्पृहा नोत्पद्यते ततश्च श्रेयसे वर्त्तते । इत्यन्यत्वाऽनुप्रेक्षा ।

२ 'अङ्ग' इति संबोधनं कोमलाऽऽलापमंत्रणे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाऽशुचित्वाऽनुप्रेक्षा—शुचित्वं द्वेधा, लोकोत्तरं लौकिकं चेति। तत्राऽत्मनो विशुद्धध्यानजलप्रक्षालितकर्मकलंकस्य स्वात्मन्यवस्थानं लोकोत्तरशुचित्वं, तत्साधनानि सम्यग्दर्शनज्ञानचारित्रतपांसि तद्वन्तश्च साधवस्तदधिष्ठानानि च निर्वाणभूम्यादिकानि । तत्प्राप्त्युपायत्वाच्छुचिव्यपदेशमर्हन्ति । लौकिकं शुचित्वं कालाऽग्निभस्ममृत्तिकागोमयसलिलाऽज्ञाननिर्विचिकित्सत्वभेदादष्टविधं तदिदं शरीरं शुचीकर्तुं न शक्यते कुतोऽत्यंताऽशुचित्वात् शरीरमिदमाद्युत्तराशुचिकारणादिभिरशुचि लक्ष्यते । तद्यथा—आद्यं तावत्कारणं शरीरस्य शुक्रं शोणितं च तदुभयमत्यन्ताऽशुचि । उत्तरकारणमाहारपरिणामादिकवलाऽऽहारोऽपि ग्रस्तमात्रः श्लेष्माशयं प्राप्य श्लेष्मणा द्रवीकृतोऽधिकमशुचि भवति, ततः पित्ताशयं प्राप्य पच्यमान आम्लीकृतोऽशुचिरेव भवति, पक्वो वाताशयमवाप्य वायुना विभज्यमानः खलरसभावेन भिद्यते । खलभागो मूत्रपुरीषादिद्रवघनमलविकारेण विविच्यते, रसभागः शोणितमांसमेदोऽस्थिमज्जाशुक्रभावेन परिणमते । सर्वेषां चैषामशुचीनां भाजनं शरीरमवस्करवदशक्यप्रतीकारं । खल्विदं शरीरं स्नानानुलेपनधूपप्रघर्षवस्त्रमाल्यादिभिरपि न शक्यमशुचित्वमपहर्तुं । अंगारवदाश्रितमपि द्रव्यमाश्वेवाऽऽत्मस्वभावमापादयति । शरीरजा अपि गोमयगोरोचनादन्तिदंतचमरीवालमृगनाभिखड्गिविषाणमयूरपिच्छसर्पमणिशुक्तिमुक्ताफलादयो लोकेषु शुचित्वमुपगताः । नास्त्यत्र पुनः शरीरे किंचित्कमनीयं शुचि वा न जलादीनां शुचिहेतुत्वं । सम्यग्दर्शनादि पुनर्भाव्यमानं जीवस्यात्यंतिकीं शुद्धिमाविर्भावयतीति तत्त्वभावनमशु-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

चित्वाऽनुप्रेक्षा । एवमस्य संस्मरतः शरीरनिर्वेदो भवति निर्विण्णश्च जन्मोदधितरणाय चित्तं समाधत्त इत्यशुचित्वाऽनुप्रेक्षावर्णनम् ।

अथाऽस्रवाऽनुप्रेक्षावर्णनं विधीयते । उद्वेगार्थमास्रवोपक्षेपः, आस्रवा ह्रीहाऽमुत्र चापाययुक्ता महानदीस्रोतोवेगतीक्ष्णा इन्द्रियादयः । अविरलसरलशल्लकीसहकारवंशकुंडगप्रमथनस्वच्छसरोवरसलिलावगाहनमृदुसुखस्पर्शिमहीतलविहरणादिगुणसंपन्ना वनविहारिणो मदांधा महाकाया बलवन्तोऽपि वारणा हस्तिबंधकीषु स्पर्शनेन्द्रियप्रसक्तचित्ता मनुष्यविधेयतामुपगम्य वधबन्धदमनवाहनांकुशताडनपार्ष्णिघातादिजनितं तीव्रं दुःखमनुभवन्ति । नित्यमेव च स्वयूथस्वच्छन्दप्रचारसुखस्य वनवासस्याऽनुस्मरन्तो महान्तं खेदमवाप्नुवन्ति । तथैव जिह्वेन्द्रियाविषयलोभात् स्रोतोवेगावगाहिमृतहस्तिशरीरस्था वायसा अपारसागरावर्तान्तिःपातव्यसनमुपनिपतन्ति । मत्स्याश्चागाधसलिलसंचारिणो लोचनगोचरातीता रसनेन्द्रियवशंगता आमिषलोभेन लोहमास्वाद्य म्रियन्ते । घ्राणेन्द्रियलोलुपाश्चौषधगंधलुब्धपन्नगा विनिपातमिच्छन्ति, मधुकराश्च दानगंधलुब्धा गजकर्णझलंझलामुपगम्य मरणमासादयन्ति । चक्षुरिन्द्रियविषयीकृताः प्रदीपावलोकेन लोलाः पतङ्गा व्यसनप्रपाताऽभिमुखा भवन्ति । श्रोत्रेन्द्रियविषयसंगाकृष्टमनसो गीतध्वनिविषंगविस्मृततृणग्रसना हरिणा अनर्थोन्मुखा भवन्ति । परत्र च नानाजातिषु बहुविधदुःखप्रज्वलितासु पर्यटन्ति । तथा स्वयंप्रभाङ्गसंगतसुखस्पर्शलाभलोभाऽऽकृष्टचित्तोऽश्व-

---

स्मरणे षष्ठीविभक्तिरपि भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रीवो विद्याधरचक्रवर्त्ती त्रिखंडाधिपतिः सपुत्रः सबांधवो निधनतामुपगतः। तथा च रसनेन्द्रियघ्राणेन्द्रियलोलुपः सुभूमः सकलचक्रवर्त्ती षट्खंडाधिपतिर्वणिग्वेषधारिणा जन्मान्तरवैरिणा समुद्रमध्ये मरणमुपगतः। तथा च वर्वरीचिलातिकानृत्यावलोकनविहिताऽऽसक्तिर्दमितारिरर्द्धचक्रवर्त्ती सकलपरिजनसमेतो विराममुपजगाम। तथा च हस्तिपकमधुरगीतरवश्रवणसंसक्तमतिरमृतमतिर्यशोधरमहाराजमहादेवी स्वकुलपरिभ्रष्टा कुष्ठाधिष्ठितशरीरा मृतिमुपगम्य नरकदुःखभागिनी बभूव। एवमेकैकेन्द्रियविषयैर्विषसमैस्तथाविधा अपि विनष्टाः किं पुनः पंचेन्द्रियविषयाभिलाषिण इत्येवमाद्यास्रवदोषाऽनुचिन्तनमास्रवाऽनुप्रेक्षा। एवमस्य चिन्तयतः क्षमादिधर्मः श्रेयस्त्वबुद्धिर्न प्रच्यवते। सर्वेऽप्येते आस्रवदोषाः कर्मवत्संवृतेंद्रियस्य न भवन्ति। इत्यास्रवाऽनुप्रेक्षावर्णनम्।

अथ संवराऽनुप्रेक्षावर्णनं विधीयते। आस्रवनिरोधः संवरः। यथा वणिङ्महार्णवे यानपात्रविवरद्वारजलास्रवपिधाने निरुपद्रवमभिलषितदेशान्तरं प्राप्नोति तथा मुनिरपि संसारार्णवे शरीरपोतस्येन्द्रियविषयद्वारकर्मजलास्रवं तपसा पिधाय मुक्तिवेलापत्तनं निर्विघ्नं प्राप्नोति इत्येवं संवरगुणाऽनुचिंतनं संवराऽनुप्रेक्षा। एवमस्य चिन्तयतः संवरे नित्योद्युक्तता भवति। इति संवराऽनुप्रेक्षावर्णनम्।

अथ निर्जराऽनुप्रेक्षावर्णनं विधीयते। कर्मैकदेशगलनं निर्जरा, साऽपि द्वेधा, उदयोदीरणाविकल्पात्। तत्र नरकादिषु कर्मफलविपाकोदयोद्भवा। परीषहजयोदुदीरणोद्भवा। सा शुभाऽनुबंधा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरनुबंधा चेत्येवं निर्जराया गुणदोषभावनं निर्जराऽनुप्रेक्षा । एवमस्याऽनुस्मरतः कर्मनिर्जरायै वृत्तिर्भवति । इति निर्जराऽनुप्रेक्षावर्णनम् ।

अथ लोकाऽनुप्रेक्षावर्णनं विधीयते । जीवादिपदार्थाधिकरणं लोकः समन्तादनंतानंतस्वात्मप्रतिष्ठाऽऽकाशसुबहुमध्यप्रदेशस्थितस्तनुवातघनानिलघनोदधिवेष्टितो लोकस्तन्मध्यगता त्रसनाडी, तन्मध्ये महामेरुस्तस्याधः स्थिता नरकप्रस्तारा, मेरुपरिवृताः शुभनामानो द्वीपसमुद्रा द्विर्द्विर्विष्कंभा वलयाकृतयो, मेरोरुपरि स्वर्गपटलानि, तेषामुपरि सिद्धक्षेत्रं । एवमधस्तिर्यगूर्द्ध्वभेदभिन्नस्य चतुर्दशरज्जूत्सेधस्य सप्तैकपंचैकरज्जुप्रसृतपूर्वापरविभागस्य सप्तरज्जुविस्तारदक्षिणोत्तरदिग्भागस्य वेत्रासनझल्लरीमृदंगसमानाऽऽकारस्य षट्द्रव्यनिचितस्याकृत्रिमस्यानादिनिधनस्य लोकस्य स्वभावपरिणामपरिणाहसंस्थानाऽनुचिंतनं लोकाऽनुप्रेक्षा । एवमस्याध्यवस्यतस्तत्त्वज्ञानविशुद्धिर्भवति । इति लोकानुप्रेक्षावर्णनम् ।

अथ बोधिदुर्लभाऽनुप्रेक्षावर्णनं विधीयते । स्कन्धांडराऽऽवासपुलविशरीरेषु स्कंधा असंख्यातलोकमात्रा, एकैकस्मिन् स्कंधेऽसंख्यातलोकमात्रा अंडरा, एकैकस्मिन्नंडर आवासा असंख्यातलोकमिताएकैकमिन्नावासे पुलयोऽसंख्यातलोकप्रमाणा, एकैकस्मिवन्पुलवौ असंख्यातलोकप्रमितानि शरीराण्येकैकस्मिन्निगोदशरीरे जीवाः सर्वातीतकालसिद्धानामनंतगुणाः । उक्तं च ।

एयनिओयसरीरे जीवा दव्वपमाणदो दिट्ठा ।
सिद्धेहिं अणंतगुणा सव्वेण वितीदकालेण ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्येवं सर्वलोको निरन्तरं निचितः स्थावरैस्ततस्तत्र वालुकासमुद्रे पतितवज्रसिकताकणिकेव त्रसता दुर्लभास्तत्र च विकलेंद्रियाणां प्रचुरभूयिष्ठत्वात्पंचेंद्रियता गुणेषु कृतज्ञतेव कृच्छ्रलभ्या । तत्र च तिर्यक्षु पशुमृगपक्षिसरीसृपादिषु बहुषु सत्सु मनुष्यभवश्चतुष्पथे रत्नराशिवद्दुरासदस्तत्प्रच्यवे पुनस्तदुपपत्तिर्दग्धा तरुपुद्गलतद्भावाऽऽपत्तिवद्दुर्लभा । तल्लाभे च कुदेशानां हिताहितविचारविरहितानां पशुसमानमानवाकीर्णानां बहुत्वात्सुप्रदेशः पाषाणेषु मणिरिव न सुलभः । लब्धेऽपि सुदेशे पापकर्मजीवकुलाकुलत्वात्कुले जन्म वृद्धोपसेवाविरहिते विनयवत्कृच्छ्रलभ्यं । लोकस्य कुले हि जातिः प्रायेण शीलविनयाचारसंपत्तिकरी भवति । सत्यामपि कुलसंपदि दीर्घायुरिन्द्रियबलरूपनीरोगत्वादीनि दुर्लभानि । सर्वेष्वपि तेषु लब्धेषु सद्धर्मप्रतिलंभो यदि न स्यात् व्यर्थं जन्म वदनमिव दृष्टिविकलं । तमेवमतिदुर्लभं सद्धर्मं कथं कथमप्यवाप्य विषयसुखे रंजनं भस्मार्थं चन्दनदहनमिव विफलं । विरक्तविषयसुखस्य तपोभावनाधर्मप्रभावनासुखमरणादिलक्षणः समाधिर्दुर्लभस्तस्मिन्सति बोधिलाभः फलवान् भवतीति चिंतनं बोधिदुर्लभत्वाऽनुप्रेक्षा । एवमस्य भावयतो बोधिं प्राप्य प्रमादो न कदाचिदपि भवति । इति बोधिदुर्लभाऽनुप्रेक्षावर्णनं ।

अथ धर्मस्वाख्याताऽनुप्रेक्षावर्णनं विधीयते । चतुर्दशगुणस्थानानां गत्यादिचतुर्दशमार्गणास्थानेषु स्वतत्त्वविचारलक्षणो धर्मः । निःश्रेयसप्राप्तिहेतुरहो भगवद्भिरर्हद्भिः स्वाख्यात इति चिंतनं धर्मस्वाख्यातत्वाऽनुप्रेक्षा । एवमस्य चिंतयतो धर्मानुरागः सदा प्रतिपन्नो भवति । इत्येवं चिन्तनं संस्थानविचयमष्टमं धर्म्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाऽऽज्ञाविचयस्वरूपाद्युच्यते । आज्ञाविचयमतीन्द्रियज्ञानविषयं विज्ञातुं चतुर्षु ज्ञानेषु बुद्धिशक्त्यभावात्परलोकबंधमोक्षलोकालोकसदसद्विवेकवृद्धिप्रभावधर्माधर्मकालद्रव्यादिपदार्थेषु सर्वज्ञप्रामाण्यात्तत्प्रणीताऽऽगमकथितमवितथं नान्यथेति सम्यग्दर्शनस्वभावत्वान्निश्चयचिंतनं नवमं धर्म्यम् ।

अथ हेतुविचयस्वरूपमुच्यते । हेतुविचयमागमविप्रतिपत्तौ नयविशेषगुणप्रधानभावोपनयदुर्धर्षस्याद्वादप्रतिक्रियाऽवलंबिनस्तर्कानुसारिरुचेः पुरुषस्य स्वसमयगुणपरसमयदोषविशेषपरिच्छेदेन यत्र गुणप्रकर्षस्तत्राऽभिनिवेशः श्रेयानिति स्याद्वादतीर्थकरप्रवचने पूर्वापराविरोधहेतुपरिग्रहणसामर्थ्येन समवस्थानगुणानुचिंतनं हेतुविचयं दशमं धर्म्यम् ।

सर्वमेतद् धर्मध्यानं पीतपद्मशुक्ललेश्याबलाधानमविरतादिसरागगुणस्थानभूमिकं द्रव्यभावात्मकसप्तप्रकृतिक्षयकारणं । आ अप्रमत्तादन्तर्मुहूर्त्तकालपरिवर्त्तनं परोक्षज्ञानत्वात् क्षायोपशमिकभावं स्वर्गापवर्गगतिफलसंवर्त्तनीयं । शेषैकविंशतिद्रव्यभावलक्षणमोहनीयोपशमक्षयनिमित्तमिति ।

शुक्लध्यानं द्विविधं; शुक्लं, परमशुक्लमिति । शुक्लं द्विविधं पृथक्त्ववितर्कवीचारमेकत्ववितर्कावीचारमिति । परमशुक्लं द्विविधं; सूक्ष्मक्रियाऽप्रतिपातिसमुच्छिन्नक्रियानिवर्त्तिभेदात् । तल्लक्षणं द्विविधं; बाह्यमाध्यात्मिकमिति । गात्रनेत्रपरिस्पन्दविरहितं जंभजृंभोद्गारादिवर्जितमनभिव्यक्तप्राणापानप्रचारत्वमुच्छिन्नप्राणापानप्रचारत्वमपराजि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्वं बाह्यं, तदनुमेयं परेषामात्मनः स्वसंवेद्यमाध्यात्मिकं तदुच्यते। पृथक्त्वं नानात्वं, वितर्को द्वादशांगश्रुतज्ञानं, वीचारोऽर्थव्यंजनयोगसंक्रांतिः, व्यंजनमभिधानं, तद्विषयोऽर्थः, मनोवाक्कायलक्षणो योगः, अन्येऽन्यतः परिवर्त्तनं संक्रांतिः। पृथक्त्वेन वितर्कस्यार्थव्यंजनयोगेषु संक्रांतिवीचारो यस्मिन्नस्तीति तत्पृथक्त्ववितर्कवीचारं प्रथमं शुक्लं। तद्यथा—अनादिसंभूतदीर्घसंसारस्थितिसागरे पारं जिगमिषुर्मुमुक्षुः स्वभावविजृंभितपुरुषाकारसामर्थ्याद्द्रव्यपरमाणुं भावपरमाणुं वैकमवलंब्य संहृताऽशेषचिंताविक्षेपो महासंवरसंवृतः कर्मप्रकृतीनां स्थित्यनुभागौ ह्रासयन्नुपशमयन् क्षपयँश्च परमबहुकर्मनिर्जरस्त्रिषु योगेष्वन्यतमस्मिन्वर्त्तमान एकस्य द्रव्यस्य गुणं वा पर्यायं वा बहुनयगहननिलीनं श्रुतरविकिरणोद्योतबलेनान्तर्मुहूर्त्तकालं ध्यायति, ततः परमर्थान्तरं संक्रामत्यथ वाऽस्यैवार्थस्य गुणं वा पर्यायं वा संक्रामति पूर्वयोगाद्योगान्तरं व्यंजनाद् व्यंजनान्तरं संक्रामति इति। अर्थार्थान्तरगुणगुणान्तरपर्यायपर्यायान्तरेषु योगत्रयं संक्रमणेन तस्यैव ध्यानस्य द्वाचत्वारिंशद्भंगा भवन्ति। तद्यथा—षण्णां जीवादिपदार्थानां क्रमेण ज्ञानवर्णगतिस्थितिवर्त्तनाऽवगाहनादयो गुणास्तेषां विकल्पाः पर्यायाः। अर्थादन्योऽर्थोऽर्थान्तरं गुणादन्यो गुणान्तरं पर्यायादन्यः पर्यायान्तरं। एवमर्थार्थान्तरगुणगुणांतरपर्यायपर्यायान्तरेषु षट्सु योगत्रयसंक्रमादष्टादश भंगाः। अर्थाद्गुणगुणांतरपर्यायपर्यायान्तरेषु चतुर्षु योगत्रयसंक्रमणेन द्वादश भंगा भवन्ति। एवमर्थान्तरस्यापि द्वादश भंगा भवन्ति। सर्वे संपिंडिता द्वाचत्वारिंशद्भंगा भवन्ति। एवंविधं प्रथमशुक्लध्यानमुपशांतकषायेऽस्ति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षीणकषायस्यादावस्ति । तत्र शुक्लतरलेश्याबलाधानमंतर्मुहूर्त्तकालपरिवर्त्तनं क्षायोपशमिकभावमुपात्तार्थव्यंजनयोगसंक्रमणं चतुर्दशादशनवपूर्वधरयतिवृषभनिषेव्यमुपशांतक्षीणकषायभेदात् । स्वर्गापवर्गगतिफलसंवर्त्तनीयमिति ।

द्वितीयशुक्लध्यानमुच्यते । एकस्य भाव एकत्वं, वितर्को द्वादशांगं, अवीचारोऽसंक्रांतिः । एकत्वेन वितर्कस्य श्रुतस्यार्थव्यंजनयोगानामवीचारोऽसंक्रांतिर्यस्मिन्ध्याने तदेकत्ववितर्कावीचारं ध्यानं । एकयोगेनार्थगुणपर्यायेष्वन्यतमस्मिन्नवस्थानं पूर्ववत्पूर्वधरयतिवृषभनिषेव्यं । द्रव्यभावात्मकज्ञानदर्शनावरणांतरायघातिकर्मत्रयवेदनीयप्रभृत्यघातिकर्मसु केषांचिद्भावकर्मविनाशनसमर्थमुत्तमतपोऽतिशयरूपं पूर्वोक्तक्षीणकषायाविशिष्टकालभूमिकमशेषार्थव्यंजनयोगसंक्रमणविषयचिन्ताविक्षेपरहितं असंख्यातगुणश्रेणिकर्मनिर्जरणं भवति । एवंविधे द्वितीयशुक्लध्याने घातित्रयविनाशनानन्तरं क्षायिकज्ञानदर्शनसम्यक्त्वचारित्रदानलाभभोगोपभोगवीर्यातिशयशक्तिगभस्तिप्रज्वलितकेवलिजिनभास्करोदयो व्यतिक्रान्तछद्मस्थज्ञानदर्शनशरीरभाषान्तःकरणप्रकृतिः संजायते । स खलु केवलिजिनकुंजरो भगवाँस्तीर्थकर इतरो वा कृतकृत्यः सिद्धसाध्यो बुद्धबोध्योऽत्यंताऽपुनर्भवलक्ष्मीपरिष्वक्तात्माऽचिन्त्यज्ञानवैराग्यैश्वर्यमाहात्म्यः सर्वलोकेश्वराणामभिगमनीयोऽर्चनीयोऽभिवंद्यश्चोत्कर्षेण देशोनपूर्वकोटिकालं विहरति सयोगिभट्टारकः स यदांतर्मुहूर्त्तशेषायुष्कः समस्थितिवेद्यनामगोत्रश्च भवति तदा वादरकाययोगे स्थित्वा क्रमेण वादरमनोवचनोच्छ्वासनिःश्वासं वादरकाययोगं च निरुध्य ततः सूक्ष्मकाय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगे स्थित्वा क्रमेण सूक्ष्म मनोवचनोच्छ्वासनिश्वासं निरुध्य सूक्ष्म-काययोगः स्यात्तस्यैव सूक्ष्मक्रियाऽप्रतिपातिध्यानं भवति तच्छुक्लं सामान्येन तृतीयं परमशुक्लाऽपेक्षया प्रथमं। यदा पुनरन्तर्मुहूर्त्तशेषा-युष्कस्तदधिकस्थितिकर्मत्रयः सयोगिजिनस्तदात्मोपयोगातिशयः कर्मारातिशातनसमर्थः सामायिकखड्गसहायो विशिष्टक्रियो महासं-वरसंवृतो लघुकर्मपरिपातनश्च भूत्वा शेषकर्मरेणुपरिशातनशक्ति-स्वभावात्समयैकदंडके चतुःसमये दंडकपाटलोकप्रतरपूरणाभिः स्वात्मप्रदेशविसर्पणे जाते तावद्भिरेव समयैरुपसंहृतविसर्पण आयुष्यसमीकृताऽघातित्रयस्थितिनिर्वर्त्तितसमुद्घातक्रियः पूर्व-शरीरपरिमाणो भूत्वांऽतर्मुहूर्त्तेन पूर्ववत्क्रमेण योगनिरोधं विधाय प्रथमपरमशुक्लध्यानं निष्ठापयन् ततः समये द्वितीयपरमशुक्लध्यानं प्रारब्धुमर्हति। तत्पुनरत्यंतपरमशुक्लं समुच्छिन्नप्राणापानप्रचारसर्व-कायवाङ्मनोयोगप्रदेशपरिस्पंदक्रियाव्यापारतया समुच्छिन्नक्रियानिव-र्त्तीत्युच्यते। तत्र ध्याने सर्वास्रवनिरोधे सति सर्वशेषकर्मपरिशातन-सामर्थ्योत्पत्तिमतोऽयोगिकेवलिनः संपूर्णशीलगुणं सर्वसंसारदुःखज्वा-लापरिष्वंगच्छेदजननं साक्षान्मोक्षकारणं भवति। स पुनरयोगके-वली भगवाँस्तदा ध्यानानलसंनिर्दग्धसर्वमलकलंकेन्धनो निरस्त-प्रतिसारि। उपरिस्थितान्येव जानात्यनुसारि। उभयपार्श्वे स्थि-तानि पदानि नियमेनानियमेन वा नात्युभयसारि। एवमेकस्य पदस्यार्थं परत उपश्रुत्यादावंते मध्ये वाऽशेषग्रंथार्थावधारणं पदानुसारित्वं। द्वादशयोजनाऽऽयामे नवयोजनविस्तारे चक्र-धरस्कंधावारे गजवाजिखरोष्ट्रमनुष्यादीनामक्षरानक्षररूपाणां ना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाविधकरंबितशब्दानां युगपदुत्पन्नानां तपोविशेषबललाभाऽऽपादित-सर्वजीवप्रदेशप्रकृष्टश्रोत्रेन्द्रियपरिणामात्सर्वेषामेककाले ग्रहणं तत्प्रति-पादनसमर्थत्वं च संभिन्नश्रोतृत्वं । तपःशक्तिविशेषाऽऽविर्भा-वितासाधारणरसनेन्द्रियश्रुतावरणवीर्यान्तरायक्षयोपशमांगोपांगनाम-लाभापेक्षस्यावधृतनवयोजनक्षेत्राद्बहिर्बहुयोजनविप्रकृष्टक्षेत्रादायातस्य रसस्यास्वादनसामर्थ्यं दूरास्वादनमेवं शेषेष्वपीन्द्रियविशेषेष्वधृतक्षेत्रा-द्बहिर्बहुयोजनविप्रकृष्टदेशादायतेषु ग्रहणसामर्थ्यं योज्यं । रोहिण्यादि-पंचशतमहाविद्यादेवताभिरनुगतांगुष्ठप्रदेशनादिसप्तशतक्षुल्लकविद्यादेव-ताभिस्ताभिरागताभिः प्रत्येकमात्मीयरूपसामर्थ्याविष्करणकथनकुश-लाभिर्वेगवतीभिरचलितचारित्रस्य दशपूर्वदुस्तरसमुद्रोत्तारणं दशपूर्वित्वं श्रुतकेवलिना चतुर्दशपूर्वित्वं । अष्टौ महानिमित्तान्यांतरिक्षं भौमां-गस्वरव्यंजनलक्षणच्छिन्नस्वप्ननामानि । तत्र रविशशिग्रहनक्षत्रतारा-भगणोदयास्तमयादिभिरतीतानागतफलप्रतिभागप्रदर्शनमांतरिक्षं । भुवोघनसुषिरस्निग्धरूक्षादिविभावनेन पूर्वादिदिक्सूत्रविन्यासेन वा वृद्धिहानिजयपराजयादिविज्ञानं भूमेरंतर्निहितसुवर्णरजतादिसंस्तवनं च भौमं । तिर्यङ्मनुष्याणां सत्वसभाववातादिप्रकृतिरसरुधिरादिधा-तुशरीरवर्णगन्धनिम्नोन्नतांगप्रत्यंगदर्शनस्पर्शनादिभिस्त्रिकालभाविसुख-दुःखादिविभावनमंगं । नरनारीखरपिंगलोलूककपिवायसशिवाशृगाला दीनामक्षराऽनक्षरात्मकशुभाशुभशब्दश्रवणेनेष्टानिष्टफलाविर्भावकः स्वरः । शिरोमुखग्रीवादिषु तिलकमशकलक्ष्मव्रणादिवीक्षणेन त्रिकाल-हिताहितवेदनं व्यंजनं । पाणिपादतलवक्षःस्थलादिषु श्रीवृक्षस्वस्तिकभृं-गारककलशकुलिशादिलक्षणवीक्षणात् त्रैकालिकस्थानमानैश्वर्यादिवि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शेषणं लक्षणं। वस्त्रशास्त्रोपानदासनशयनादिषु देवमानुषराक्षसकृतविकिट्टपाषाणजात्यकनकवल्लब्धात्मस्वभावस्तदनंतरं पूर्वप्रयोगादाविद्धकुलालचक्रवदसंगत्वादपगतलेपालांबुवत्तथाबंधच्छेदादेरंडवीजवत्तथागतिपरिणामादग्निशिखावदूर्ध्वं गच्छतीत्यालोकांताद्गत्युपग्रहकारणधर्मास्तिकायाऽभावादलोकं न गच्छति । एवमुक्तधर्म्यशुक्लयो राद्धांतसद्भावविषयसामान्ययोर्विषयं प्रत्यभेदः, अयं तु विशेषः । धर्मध्यानं सकषायपरिणामस्यैकस्मिन्वस्तुनि चिरकालं न तिष्ठति रथ्याऽवस्थितप्रदीपवत् । शुक्लध्यानं पुनर्वीतरागपरिणामस्यैकस्मिन् वस्तुनि धर्मध्यानावस्थानकालात्संख्येयगुणमचंचलत्वादवतिष्ठते मणिप्रदीपवत् ।

एवमुक्तं द्वादशविधं तपः सर्वार्थसाधनं, तत एव हि ऋद्धयः संजायंते । ताश्चर्द्धयो बुद्धिक्रियाविक्रियातपोबलौषधरसक्षेत्रभेदादष्टविधाः । तत्र बुद्धिमहर्द्धिनाम बुद्धिरवगमो तद्विषया बुद्धिऋद्धिरष्टादशविधा । केवलमवधिर्मनःपर्ययज्ञानं बीजबुद्धिः कोष्ठबुद्धिः पादानुसारित्वं संभिन्नश्रोतृत्वं दूराऽऽस्वादनस्पर्शनघ्राणदर्शनश्रवणसमर्थता दशपूर्वित्वं चतुर्दशपूर्वित्वं चाष्टांगमहानिमित्तज्ञता प्रज्ञाश्रवणत्वं प्रत्येकबुद्धिता वादित्वं चेति । तत्र द्रव्यक्षेत्रकालभावकरणक्रमव्यवधानाऽभावे युगपदेकस्मिन्नेव समये त्रिकालवर्तिसर्वद्रव्यगुणपर्यायपदार्थविभासकं केवलज्ञानं । द्रव्यक्षेत्रकालभावैः प्रत्येकं विज्ञायमानदेशपरमसर्वभेदभिन्नमवधिज्ञानाऽऽवरणक्षयोपशमनिमित्तं रूपिद्रव्यविषयमवधिज्ञानं । द्रव्यादिभेदैः प्रत्येकमवगम्यमानर्जुविपुलमतिविकल्पं मनःपर्ययज्ञानावरणक्षयोपशमकारणं रूपिद्रव्यानंतभागविषयं मनःपर्ययज्ञानं । सुकृष्टवसुमतीकृते क्षेत्रे सारवति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालादिसहायापेक्षं बीजमेकमुप्तं यथाऽनेककोटिबीजप्रदं भवति तथा नो-इन्द्रियश्रुतावरणवीर्यान्तरायक्षयोपशमप्रकर्षे सति संख्येयशब्द-स्यानंतार्थप्रतिबद्धस्यानंतलिंगैः सहैकपदस्य ग्रहणादनेकार्थप्रतिपत्तिर्बी-जबुद्धिः । कोष्ठाऽगारिकस्थापितानामसंकीर्णानामविनष्टानां भूयसां धान्यबीजानां यथा कोष्ठावस्थानं तथा परोपदेशादवधारितानामर्थ-ग्रंथबीजानां भूयसामव्यतिकीर्णानां बुद्ध्यवस्थानं कोष्ठबुद्धिः । पादा-नुसारित्वं त्रेधा प्रतिसार्यनुसार्युभयसारिभेदात् । तत्र बीजपदादधः-स्थितान्येव पदानि बीजपदस्थितिलिंगेन जानाति भागैः शस्त्रकंटक-मूषिकादिकृतच्छेददर्शनात् कालत्रयविषयलाभालाभसुखदुःखादिसं-स्तवनं छिन्नं । वातपित्तश्लेष्मोदयरहितस्य पश्चिमरात्रिविभागे चन्द्र-सूर्यधराद्रिसमुद्रमुखप्रवेशनसकलमहीमंडलोपगूहनादिशुभस्वप्नदर्शनात् घृततैलाभ्यक्तात्मीयदेहखरकरभारूढापाग्दिग्गमनाद्यशुभस्वप्नदर्शनादा-गामिजीवितमरणसुखदुःखाऽऽविर्भाविकः स्वप्नः । स च द्विविधः; छिन्नमालाविकल्पेन । गजेन्द्रसिंहपोतादिकैश्छिन्नः । पूर्वापरसंबंधानां भावानां दर्शनं माला । एतेषु महानिमित्तेषु कौशलमष्टांगमहानि-मित्तज्ञता ।

अतिसूक्ष्मार्थतत्त्वविचारगहने चतुर्दशपूर्विण एव विषयेऽनुपयुक्ते पृष्टेऽनधीतद्वादशांगचतुर्दशपूर्वस्य प्रकृष्टश्रुतावरणवीर्यान्तरायक्षयो-पशमाविर्भूताऽसाधारणप्रज्ञाशक्तिलाभान्निःसंशयनिरूपणं प्रज्ञाश्रव-णत्वं । सा च प्रज्ञौत्पत्तिकी वैनयिकी कर्मजा पारिणामिकी चेति चतुर्विधा । तत्र जन्मांतरविनयजनितसंस्कारसमुत्पन्नौत्पत्तिकी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनयेन द्वादशांगानि पठतः समुत्पन्ना वैनायिकी। दुश्चरतपश्चरण-बलेन गुरूपदेशमंतरेण समुत्पन्ना कर्मजा। स्वकीयस्वकीयजातिवि-शेषेण समुत्पन्ना पारिणामिकी चेति।

परोपदेशमन्तरेण स्वशक्तिविशेषादेव ज्ञानसंयमविधाने नैपुण्यं प्रत्येकबुद्धिता।

शक्रादिष्वपि प्रतिबंधकेषु सत्स्वतिप्रतिहततया प्रतिभया निरुत्तराभिधानं पररंध्रान्वेषणं च वादित्वं। इति बुद्धिऋद्धिप्रकरणम्।

अथ क्रियर्द्धिः। क्रियाविषया ऋद्धिर्द्विविधा, चारणत्वमाकाशगामित्वं चेति। तत्र चारणाऽनेकविधा, जलजंघातंतुपुष्पपत्रबीजश्रेण्यग्निशिखाद्यालंबनगमनाः। जलमुपादाय वाप्यादिष्वप्कायिकजीवानविराधयंतो भूमाविव पादोद्धारनिक्षेपकुशला जलचारणाः। भूमेरुपर्याऽऽकाशे चतुरंगुलप्रमाणे जंघोत्क्षेपनिक्षेपशीघ्रकरणपटवो बहुयोजनशताऽऽशुगमनप्रवणा जंघाचारणाः। एवमितरे बोद्धव्याः॥ पर्यंकावस्था वा निषण्णा वा कायोत्सर्गशरीरा वा पादोद्धारनिक्षेपणा वा ताभ्यामंतरेण वाऽऽकाशगमनकुशला आकाशगामिनः। इति क्रियर्द्धिः।

विक्रियागोचरा ऋद्धिरनेकविधा। अणिमा, महिमा, लघिमा, गरिमा, प्राप्तिः, प्राकाम्यं, ईशत्वं, वशित्वं अप्रतिघातः, अंतर्धानं, कामरूपित्वमादि। तत्राऽणुशरीरविकरणमणिमा। विसच्छिद्रमपि प्रविश्याऽऽसीत तत्र चक्रवर्त्तिपरिवारविभूतिं सृजेत्। मेरोरपि महत्तरशरीरविकरणं महिमा। वायोरपि लघुतरशरीरता लघिमा। वज्रादपि गुरुतरदेहता गरिमा। भूमौ स्थित्वांऽगुल्यग्रेण मेरुशिखरदिवाकरा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिस्पर्शनसामर्थ्यं प्राप्तिः। अप्सु भूमाविव गमनं भूमौ जल इवो-न्मज्जननिमज्जनकरणं प्राकाम्यं, अनेकजातिक्रियागुणद्रव्याधीनं स्वांगाद्भिन्नमभिन्नं च निर्माणं प्राकाम्यं सैन्यादिरूपमिति केचित्। त्रैलोक्यस्य प्रभुत्वमीशित्वं। सर्वजीववशीकरणलब्धिर्वशित्वं। अद्रिमध्ये वियतीव गमनमप्रतिघातः। अदृश्यरूपताऽन्तर्धानं। युगपदनेकाऽऽकाररूपविकरणशक्तिः कामरूपित्वमिति, यथाऽभिलषितैकमूर्त्ताथाकारं स्वांगस्य मुहुर्मुहुः करणं कामरूपित्वमिति वा। इति विक्रियर्द्धिप्रकरणम्।

तपोऽतिशयर्द्धिः सप्तविधा। उग्रदीप्ततप्तमहाघोरतपोघोरपराक्रमाः घोरब्रह्मचर्यः अघोरगुणब्रह्मचारिण इति। तत्रोग्रतपसो द्विविधा; उग्रोग्रतपसः, अवस्थितोग्रतपसश्चेति। तत्रैकमुपवासं कृत्वा पारणं विधाय द्विदिनमुपोष्य तत्पारणानन्तरं पुनरप्युपवासत्रयं कुर्वंत्येवमेकोत्तरवृद्ध्या यावज्जीवं त्रिगुप्तिगुप्ताः संतो ये केचिदुपवसंति त उग्रोग्रतपसः। दीक्षोपवासं कृत्वा पारणानंतरमेकांतरेण चरतां केनाऽपि निमित्तेन षष्ठोपवासे जाते तेन विहरतामष्टमोपवाससंभवे तेनाचरतामेवं दशद्वादशादिक्रमेणाधो न निवर्त्तमानानां यावज्जीवं येषां विहरणं तेऽवस्थितोग्रतपसः। महोपवासकरणेऽपि प्रवर्द्धमानकायवाङ्मनोबला दुर्गंधरहितवदनाः पद्मोत्पलादिसुरभिनिःश्वासाः प्रतिदिनप्रवर्द्धमानाऽप्रच्युतमहादीप्तिशरीरा दीप्तमनसः। तप्तायसकटाहपतितजलकणवदाशु शुष्काल्पाऽऽहारतया धारणेऽपि श्रमक्लेशविरहितास्त्रिभुवनमपि कनीयस्यांगुल्योद्धृत्याऽन्यत्र स्थापयितुं समर्थाश्च कायबलिनः। इति बलर्द्धिः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथौषधर्द्धिप्रकरणम् । औषधर्द्धिरष्टविधा । असाध्यानामप्याम यानां सर्वेषां विनिवृत्तिहेतुरामर्शक्षेलजल मलविट्सर्वौषधिप्राप्ताऽऽस्याविषयदृष्टयविषविकल्पात् । आमर्शः संस्पर्शो हस्तपाद्याद्यामर्शः सकलौषधिं प्राप्तो येषां त आमर्शौषधिप्राप्ताः । क्षेलो निष्ठीवनं; उपलक्षणं चैतत्तेन श्लेष्मलालाविप्रुट्सिंहाणकादयश्चौषधिं प्राप्ता येषां ते क्षेलौषधिप्राप्ताः । स्वेदालंबनो रजोतिचयो जल्लः स औषधिं प्राप्तो येषां ते जल्लौषधिप्राप्ताः । कर्मदंतनासिकादिसमुद्भवो मल औषधिं प्राप्तो येषां ते मलौषधिप्राप्ताः । विडुच्चारः शुक्रमूत्रं चौषधिं प्राप्तो येषां ते विडौषधिप्राप्ताः । अंगप्रत्यंगनखदंतकेशादिरवयवस्तत्संस्पर्शी वाटवादिः सर्वौषधिं प्राप्तो येषां ते सर्वौषधिप्राप्ताः । उग्रविषसंपृक्तोऽप्याहारो येषामास्यगतो निर्विषो भवति, यदीयवचः श्रवणाद्वा महाविषपरीता अपि निर्विषा भवंति त आस्याविषाः । येषामालोकनमात्रादेवातितीव्रविषदूषिता अपि विगतविषा भवंति ते दृष्टयविषाः । अथवा आशीविषमविषं येषां ते आश्यविषाः, दृष्टिविषाणां विषमविषं येषां ते दृष्टयविषाः । इत्यौषधर्द्धिप्रकरणम् ॥

अत्र रसर्द्धिप्रकरणं समुच्यते । रसर्द्धिप्राप्ताः षड्विधाः, आस्यविषाः, दृष्टिविषाः, क्षीरास्राविणः, मध्वास्राविणः, सर्पिरास्रविणः, अमृताऽऽस्राविणश्चेति । प्रकृष्टतपोबला यतयो यं ब्रुवते म्रियस्वेति स तत्क्षणादेव महाविषपरीतो म्रियते त आस्यविषाः । आशीर्विषा इति केचित्तत्राप्ययमेवार्थस्तदाऽऽशासनादेव म्रियमाणत्वात् । उत्कृष्टतपसो यतयः क्रुद्धा यमीक्षंते स तदैवोग्रविषपरीतो म्रियते ते दृष्टिविषाः । विरसमण्यशनं येषां पाणिपुटे निक्षिप्तं क्षीररसवीर्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिणामितां भजते; येषां वा वचनानि क्षीरवत्क्षीणानां तर्पकाणि भवंति ते क्षीराऽऽस्राविणः। येषां पाणिपुटे पतित आहारो नीरसोऽपि मधुररसवीर्यपरिणामितां भजते येषां वा वचांसि श्रोतॄणां दुःखार्दितानामपि मधुरगुणं पुष्णांति ते मध्वाऽऽस्राविणः।येषां पाणिपात्रगतमन्नं मलरुधिरादिभावपरिणामविरहिताभ्यवहरणास्तप्ततपसः। अणिमादिजलचारणाद्यष्टगुणालंकृता विस्फुरितकायप्रभा विविधाक्षीणर्द्धियुक्ताः सर्वौषधर्द्धिप्राप्ता अमृतीकृतपाणिपात्रनिपतितसर्वाहाराः सर्वामरेंद्रेभ्योऽनंतबला आशीविषदृष्टिविषर्द्धिसमन्वितास्तप्ततपसश्च। सकलविद्याधारिणो मतिश्रुताऽवधिमनःपर्ययज्ञानाऽवगतत्रिभुवनगतव्यापारा महातपसः। वातपित्तश्लेष्मसंनिपातसमुद्भूतज्वरकासाक्षिशूलकुष्ठप्रमेहादिविविधरोगसंतापितदेहा अप्यप्रच्युताऽनशनादितपसोऽनशने षण्मासोपवासाः, अवमोदर्ये एककवलाहाराः, वृत्तिपरिसंख्याने चत्वरगोचरावग्रहाः। रसपरित्याग उष्णजलधौतोदनभोजिनः विविक्तशयनाऽऽसने भीमश्मशानगिरिगुहादरीकंदरशून्यग्रामादिषु प्रदुष्टयक्षरक्षः—पिशाचप्रनृत्यत्प्रेतवेतालरूपविकारेषु पुरुषशिवारुतानुपरतसिंहव्याघ्रादिव्यालमृगभीषणस्वनघोरचौरादिप्रचलितेष्वभिरुचितावासाः, कायक्लेशेऽतितीव्रशीतातपवर्षानिपातप्रदेशेष्वभ्रावकाशातापनवृक्षमूलयोगग्राहिणः। एवमाभ्यंतरतपोविशेशेष्वप्युत्कृष्टतपोऽनुष्ठायिनो घोरतपसः। त एव गृहीततपोयोगवर्द्धनपराः। त्रिभुवनोपसंहरणमहीवलयग्रसनसकलसागरसलिलसंशोषणजलाग्निशिलाशैलादिवर्षणशक्तयो घोरपराक्रमाः। चिरोषितस्खलितब्रह्मचर्याऽऽवासाः प्रकृष्टचारित्रमोहक्षयोपशमात्प्रणष्टदुःस्वप्ना घोरब्रह्मचारिणः, अथवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अघोरगुणब्रह्मचारिण इति पाठे अघोरं शांतं ब्रह्मचारित्रं येषां ते अघोरगुणब्रह्मचारिणः । शांतिपुष्टिहेतुत्वाद्येषां तपोमाहात्म्येन डमरेऽतिमारिदुर्भिक्षवैरकलहवधबंधनरोगादिप्रशमनशक्तिः समुत्पद्यते तेऽघोरगुणब्रह्मचारिणः । इति तपोऋद्धिः ।

अथ बलर्द्धिः । बलाऽऽलंबनादृद्धिस्त्रिविधा, मनोवाक्कायविषयभेदात् । तत्र श्रुतावरणवीर्यांतरायक्षयोपशमप्रकर्षे सति खेदमंतरेणांतमुहूर्त्ते सकलश्रुतार्थचिंतनेऽवदाता मनोबलिनः । मनोजिह्वाश्रुतावरणवीर्यांतरायक्षयोपशमातिशये सत्यंतर्मुहूर्ते सकलश्रुतोच्चारणसमर्थाः सततमुच्चैरुच्चारणे सत्यपि श्रमविरहिता अहीनकंठाश्च वाग्बलिनः । वीर्यान्तरायक्षयोपशमप्रकर्षादाविर्भूताऽसाधारणकायबलत्वान्मासिकचातुर्मासिकसांवत्सरिकादिप्रतिमायोगरूक्षमपि सर्पिरसवीर्यविपाकमवाप्नोति, सर्पिरिव वा येषां भाषितानि प्राणिनां संतर्पकाणि भवंति ते सर्पिरास्राविणः । येषां करपुटप्राप्तं भोजनं यत्किंचिदमृतमास्कंदति; येषां वा व्याहृतानि प्राणिनाममृतवदनुग्राहकाणि भवंति । इति रसर्द्धिप्रकरणम्

अथ क्षेत्रर्द्धिः । क्षेत्रर्द्धिप्राप्ता द्वेधा; अक्षीणमहानसाः, अक्षीणमहालयाश्चेति । लाभांतरायक्षयोपशमप्रकर्षप्राप्तेभ्यो यतिभ्यो भिक्षा दीयते ततो भोजनाच्चक्रधरस्कंधावारोऽपि यदि भुंजीत तद्दिवसे नान्नं क्षीयते तेऽक्षीणमहानसाः । अक्षीणमहालयलब्धिप्राप्ता यतयो यत्र हस्तचतुष्टयमात्रावासे वसंति तत्र देवमानुषतिर्यग्योनयः सर्वेऽपि निवसेयुः परस्परमबाधमानाः सुखमासते तेऽक्षीणमहालया इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमुक्तं तपःसामर्थ्यं, तपस्विभिरध्युषितानि क्षेत्राणि तीर्थत्वमुपगतानि । परस्परविरोधिनोऽपि प्राणिनो जातिविरोधं कारणविरोधं विमुच्य शांतांतरंगा भवंति तपःसामर्थ्यात् । किं बहुना तपः किं न साधयत्यपि तु सर्वमेव साधयति । तदेवोक्तम्—

यद्दूरं यद्दुराराध्यं यच्च दूरे व्यवस्थितम् ।
तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥

तपो यस्य न विद्यते स चंचापुरुषो यथा मुंचंति तं सर्वे गुणाः, नासौ मुंचति संसारं, उपधित्यागः पुरुषहितो यतोयतः परिग्रहादपेतस्ततस्ततः संयतो भवति । ततोऽस्य खेदो व्यपगतो भवति । परिग्रहपरित्याग एवैहिकामुत्रिकपरमसुखकारणं निरवद्यमनःप्रणिधानं । पुण्यनिधानं । परिग्रहो बलवती सर्वदोषप्रसवयोनिः । नत्वस्या उपधिभिरतृप्तिरस्ति सलिलैरिव सलिलनिधेर्वडवायाः । उक्तं हि—

अनेकाऽऽधेयदुष्पूर आशागर्त्तश्चिरादहो ।
चित्रं यत्क्षणमात्रेण त्यागेनैकेन पूर्यते ॥

अपि च—

कः पूरयति दुष्पूरमाशागर्त्तं दिने दिने ।
यत्रास्तमस्तमाधेयमाधारत्वाय कल्पते ॥

परिग्रहसंग एव दुःखभयादिकं जनयतीति । उपात्तेष्वपि शरीरादिषु संस्कारापोहाय 'ममेदं' भावाऽभाव आकिंचन्यं । शरीरादिष निर्ममत्वात्परमनिर्वृतिमवाप्नोति यथा यथा पोषयति तथा तथा लांपट्यं तज्जनयति, तपस्यप्यनादरो भवति । शरी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रादिषु कृताऽभिष्वंगस्य संसारे सर्वकालमभिष्वंग एव। मयाऽनुभूतांगना सुरूपेति सविलासेति कलागुणविशारदेति स्मरणं, तत्कथाश्रवणं रतिपरिमलाधिवासितस्त्रीसंसक्तशयनाऽऽसनामित्येवमादि पूर्वरतानुचिंतनवर्जनं परिपूर्णब्रह्मचर्यमित्याख्यायते। ब्रह्मचर्यमनुपालयंतं हिंसादयो दोषा न संस्पृशंति। नित्याऽभिरतगुरुकुलवासमधिवसंति गुणसंपदः। वरांगनाविलासविभ्रमविधेयीकृतः पापैरपि विधेयीक्रियते। अजितेंद्रियता हि लोके प्राणिनामपमानविधात्री।

इत्येवमुत्तमक्षमाया उत्तममार्दवस्योत्तमार्जवस्योत्तमशौचस्योत्तमसत्यस्योत्तमसंयमस्योत्तमतपस उत्तमत्यागस्योत्तमाकिंचन्यस्योत्तमब्रह्मचर्यस्य तत्प्रतिपक्षणां च गुणदोषविचारपूर्विकायां क्रोधादिनिवृत्तौ सत्यां तन्निबंधनकर्मास्रवाऽऽभावान्महान् संवरो भवति।

तत्त्वार्थराद्धान्तमहापुराणे-
ष्वाचारशास्त्रेषु च विस्तरोक्तम्।
आख्यात्समासादनुयोगवेदी
चारित्रसारं रणरंगसिंहः

इति सकलाऽऽगमसंयमसंपन्नश्रीमज्जिनसेनभट्टारकश्रीपादपद्मप्रसादाऽऽसादितचतुरनुयोगपारावारपारगधर्मविजयश्रीमच्चामुण्डरायमहाराजविरचिते भावनासारसंग्रहे चारित्रसारेऽनगारधर्मः समाप्तः॥

समाप्तोयं ग्रन्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org